सालग्राममूर्तिलक्षणम्

SALAGRAMAMOORTI LAKSHANAM

THANJAVUR MAHARAJA SERFOJI'S
SARASVATI MAHAL LIBRARY,
THANJAVUR.

Thanjavur Sarasvati Mahal Series No. 288

|| श्रीः ||

सालग्राममूर्तिलक्षणम्

SALAGRAMAMOORTI LAKSHANAM

Edited By

N. K. Ramanuja Tatachariar
Sanskrit Pandit (Retd.,)
Sarasvati Mahal Library, Thanjavur.

THANJAVUR MAHARAJA SERFOJI'S

SARASVATI MAHAL LIBRARY,

THANJAVUR

2007

விலை : ரூ. **20-00**

0288

Sarasvati Mahal Library. Thanjavur

Bibliographical Data

Title of the book	:	SALAGRAMAMOORTILAKSHANAM
Editor	:	N. K. Ramanuja Tatachariar
Publisher	:	Director, Sarasvati Mahal Library
Publication No.	:	288
Language	:	Sanskrit
Edition	:	II Edition
Date of Publication	:	February, 2007
Paper used	:	TNPL 18.6 kgs
Size of the book	:	21 x 14 cm.
Printing type used	:	14 pt.
Number of pages	:	64
Number of copies	:	500
Printer	:	Sarasvati Mahal Library Press
Binding	:	Card Board
Subject	:	Purana
Price	:	Rs. 20-00

வெளியீட்டாளர் முகவுரை

தஞ்சையில் அமைந்து தரணி முழுமைக்கும் பயன்பட்டுக் கொண்டிருக்கும் அரும்பெரும் நிறுவனம் சரசுவதி மகால் நூலகமாகும். சுவடிக் கருவூலமாகவும், பன்மொழி நூற்களஞ்சியமாகவும் திகழும் சரசுவதி மகால் நூலகம் ஆற்றிவரும் தொண்டுகள் அளப்பரியன.

இந்நூலகத்தைத் தமிழகத்தினர் மட்டுமன்றிப் பிற மாநிலத்தவரும் பிற நாட்டினரும் பயன்படுத்தி வருகின்றனர். தமிழகத்தில் உள்ள ஆய்வாளர்கள் முன்னிலும் கூடுதலான அளவில் தற்பொழுது இந்நூலகத்தைப் பார்வையிட்டும் பயன்படுத்தியும் வரும் மேம்பாடு நிகழ்ந்து வருகிறது. "முன்னைப் பழம்பொருட்கும் முன்னைப் பழம்பொருளாய், பின்னைப் புதுமைக்கும் புதுமையாக" உள்ள அரிய பொருண்மைச் சுவடிகளைப் பதிப்பித்துத் தமிழ்கூறும் நல்லுலகிற்கு அச்சு நூல்களாக அளித்துவருகிறது இந்நூலகம். **சாளக்ராமமூர்த்தி லக்ஷணம்** எனும் இந்நூலில் சாளக்ராம வழிபாடு குறித்து கூறப்படுகிறது.

இமயமலைக்கு அருகில் கண்டகி நதி பிரவகித்தது. அதன் நீரில் வச்சிரதந்தி என்னும் ஜீவராசிகள், உள்ளும் புறமும் சக்கரக் குறியுடன் பொன்வண்ணமாய் உதித்தன. அவை மண்ணினால் கூடுகளை உண்டாக்கி, அதிலேயே வாழ்ந்து மடியும். அவை மடிந்தபின் அந்தக் கூடுகள் சக்கரக் குறியுடன் காணப்படும். அவற்றை ஆற்றோரம் கரையில் கொண்டுவந்து ஒதுக்கிவிடும். உலகிலுள்ளோர், அவற்றை எடுத்துச்சென்று உள்ளே இருக்கும் பொன்னை எடுத்து அடையாளங்களைப் பார்த்து, இன்ன இன்ன மூர்த்தம் என்று உணர்ந்து விஷ்ணுவாகப் பாவித்துப் பூசிப்பார்கள். அந்த மண் கூடுதான் சாளக்ராமம்.

சாளக்ராம மூர்த்தி லக்ஷணம் எனப் பெயர்கொண்ட இந்நூலில் மொத்தம் 416 சுலோகங்கள் காணக் கிடைக்கின்றன. சாளக்ராம சிலை எவ்வாறு அமைகின்றது, எங்கே தோன்றுகிறது, அவற்றில் பெருமைகள் என்ன என்பதை யெல்லாம் இந்நூல் விளக்கமாகக் கூறுகின்றது. சாளக்ராம மூர்த்திகளுக்கு சக்கரங்களே அடிப்படை என்ற வகையில் தசாவதார மூர்த்திகள், கேசவாதி சதுர்விம்சதி மூர்த்திகள், ஈசான-அகோர- ஸத்யோஜாத-வாமதேவ-தத்புருஷாதி சைவமூர்த்திகள் உட்பட மொத்தம் 81 வகை சாளக்ராம மூர்த்திகளின் லக்ஷணம் இங்கே விவரிக்கப் பட்டுள்ளன.

சாளக்ராம மூர்த்தி லக்ஷணம் என்ற இன்நூலினை முன்னாள் சம்ஸ்க்ருதப் பண்டிதர் திரு. என். கே. ராமானுஜ தாத்தாச்சாரியார் அவர்கள் இந்நூலகப் பருவ இதழ்களில் (எண்கள். 26 மற்றும் 27 - ஆண்டு 1973, 1974, 1975) வெளியிட்டுள்ளார்கள். அன்னாருக்கு எனது நன்றியை உரித்தாக்குகின்றேன்

சாளக்ராம சிலை ஆய்வாளர்களுக்கும், ஆன்மீகத்துறை சார்ந்தோருக்கும், சிற்ப வல்லுநர்களுக்கும் இந்நூல் பெரிதும் துணைபுரியும். வழக்கம்போல் வாசகர்கள் இந்நூலினைப் படித்துப் பயன்பெற வேண்டுகிறேன்.

இந்நூல் வெளிவர நிதியுதவி வழங்கிய நடுவண் அரசுக்கும், நூலக நிருவாக அலுவலர் மற்றும் வெளியீட்டு மேலாளர் (பொறுப்பு) வகிக்கும் திரு. சாமி. சிவஞானம் அவர்களுக்கும், இந்நூல் கணினி அச்சில் வெளிவர, கணினி பிரிவில் பணிபுரியும் அனைவருக்கும் என் நன்றியை உரித்தாக்குகின்றேன்.

சா. விஜயராஜ் குமார், இ. ஆ. ப.,

தஞ்சாவூர்
13-2-2007

மாவட்ட ஆட்சித்தலைவர் மற்றும்
இயக்குநர்,
சரசுவதி மகால் நூலகம்.

முன்னுரை

இறைவழிபாட்டில் சிறந்து விளங்குகிறது நம் பாரததேசம். வழிபாடு அருவம், உருவம் அருவ உருவம் என மூவகைப்படும்.

உளன் எனில் உளன் அவனுருவம் இவ்வுருவுகள்
உளன் அலன் எனில் அவனருவம் இவ்வருவுகள்
உளன் என இலன் என இவை குணமுடைமையில்
உளன் இரு தகைமையோடு ஒழிவிலன் பரந்தே

என்பது நம்மாழ்வார் இயற்றிய திருவாய்மொழி. உருவ வழிபாட்டினை தேவாலயத்தில் நாம் காணலாம். சாளக்கிராம வழிபாடு வீடுகளில் கடைபிடிக்கப்படுகிறது. கண்டகி நதியின் வடகரையில் இமயமலைக்குத் தெற்கிலும், க்ஷேத்திரங்களுள் தலை சிறந்ததான விஷ்ணு க்ஷேத்திரம் ஒன்றுள்ளது. அதிலிருந்து 12 யோஜனை தூரத்தில் நீர் நிரம்பியதான சக்ரநதி ஓடுகின்றது. இந்நதிக்கு வடக்கில் பல்வேறு வகை சாளக்கிராம சிலைகள் கிடைக்கின்றன. நீரிலிருந்தும் நிலத்திலிருந்தும் இவைகளின் தோற்றமறியப் படுகிறது. நீரிலிருந்து உண்டானவை நைப்புடையதாக இருப்பதுடன் புஷ்டியையும் தரவல்லவை. நிலத்திலிருந்து உண்டானவை சிறிது கடினமானதாயமைவதோடு வீடுபேற்றையும் நல்குகின்றது. சாளக்கிராம சிலைகளில் அமைந்துள்ள துவாரம், சக்ரம் நிறம் ஆகியவை கருத்திற் கொண்டு இந்நூலில் கூறப்பட்ட லக்ஷணங்களையும் வைத்து மூர்த்திகளின் பெயர்கள் கண்டுகொள்ளப் படுகின்றன.

சாளக்கிராம மூர்த்தி லக்ஷணம் எனப் பெயர் கொண்ட இந்நூலில் மொத்தம் 416 சுலோகங்கள் காணக் கிடைக்கின்றன. சாளக்கிராம சிலை எவ்வாறு அமைகின்றது? எங்கே தோன்றுகிறது ? அவற்றின் பெருமைகள் என்ன ?

என்பதையெல்லாம் இந்நூல் விளக்கமாகக் கூறுகின்றது. சாளக்கிராம மூர்த்திகளுக்கு சக்ரங்களே அடிப்படை என்ற வகையில் தசாவதார மூர்த்திகள், கேசவாதி சதுர்விம்சதி மூர்த்திகள், சிவநாபி - அகோர - ஸத்யோஜாத - வாமதேவ-தத்புருஷாதி சைவமூர்த்திகள் உட்பட மொத்தம் 81 வகை சாளக்கிராம மூர்த்திகளின் லக்ஷணம் இங்கே விவரிக்கப் பட்டுள்ளன.

ஸாளக்கிராம லக்ஷணம் என்ற இந்நூலினை முன்னாள் சம்ஸ்க்ருதப் பண்டிதர் திரு. N. K. ராமானுஜ தாத்தாச்சாரியார் அவர்கள் இந்நூலகப் பருவ இதழ்களில் (எண்கள் Vol. XXVI. Nos. 1-3, Vol. XXVII. Nos. 1-3) வெளியிட்டுள்ளார். அன்னாருக்கு எனது நன்றியை உரித்தாக்குகின்றேன்.

ஸாளக்கிராம சிலை ஆய்வாளர்களுக்கும், ஆன்மீகத் துறை சார்ந்தோருக்கும், சிற்ப வல்லுநர்களுக்கும் இந்நூல் பெரிதும் துணை புரியும். வழக்கம்போல் வாசகர்கள் இந்நூலினைப் படித்துப் பயன்பெற வேண்டுகிறேன்.

முனைவர் ஆ. வீரராகவன்,
சம்ஸ்க்ருத பண்டிதர்,
சரசுவதி மகால் நூலகம்.

தஞ்சாவூர்
12-11-2006

-------✿---------

AN APPEAL

Manuscripts on Palmleaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind.

Probably you have some of these in your possession or you know friends or neighbours who possess them. You can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M. S. S. M. Library, Thanjavur.

The Manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made available to successive generations of readers and scholars for study and research. The hitherto unpublished works found among them, will be printed and published in due course, as facilities occur, with the expression of the Library's gratitude for your gift.

The great Scholar King of Tanjore, **Rajah Serfoji,** has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this world famous **"Sarasvati Mahal Library".** It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up? The Library waits for your answer.

DISTRICT COLLECTOR AND DIRECTOR
Sarasvati Mahal Library,
Thanjavur.

OUR OTHER PUBLICATIONS

Nauka Charitram	Sanskrit & Tamil	30-00
Sita Kalyanam	Sanskrit & Tamil	35-00
Gayatri Kosam	Sanskrit & Tamil	30-00
Ragaratnakaram	Sanskrit & Tamil	15-00
Dhanyakumaracharitram (Dharmaneri Kathai)	Sanskrit & Tamil	44-00
Kandukapura Mahatmyam	Sanskrit & Tamil	25-00
Ramachinthamani Aaruudam (Nandinagari Catalogue)	Sanskrit & Tamil	25-00
Vruttaratnavali (Chandas Sastram)	Sanskrit & Tamil	30-00
Kalanandakam	Sanskrit & Tamil	55-00
Prabodha Chandrika (Grammer)	Sanskrit & Tamil	70-00
Sirungarakosam	Sanskrit	12-00
Vedasara Siva Sahasram	Sanskrit	80-00
Stotra Ramayanam	Sanskrit	25-00
Mukunda Vilasam	Sanskrit	35-00
Vinatananda Vyayoga	Sanskrit	40-00
Kumaresa Satakam	Tamil	65-00
Lokaswarupam	Tamil	75-00
Kanakkathikaram	Tamil	150-00
ThiruvappanurPuranam	Tamil	50-00
Sowmiya Sagaram	Tamil	70-00
Jatakachandrika	Tamil	40-00
Marathi Lavani Songs	Marathi	35-00
Nakshatra Chinthamani (Part - II)	Tamil	100-00
Nakshatra Chinthamani (Part - III)	Tamil	200-00

।। श्रीः ।।

।। सालग्राममूर्तिलक्षणम्* ।।

श्रीरामचन्द्राय नमः

गंडक्याश्चोत्तरे तीरे गिरिराजस्य दक्षिणे ।
क्षेत्रं तु विष्णुसान्निध्यात्सर्वक्षेत्रोत्तमोत्तमम् ।। १ ।।

योजनद्वादशमितं बहुतीर्थसमाकुलम् ।
तत्र चक्रनदी नाम तीर्थं ब्रह्मादि निर्मितम् ।। २ ।।

तत्रोत्तरे महाशृङ्गे मम प्रीतिकरे सदा ।
तथा या[1] गर्भितास्तत्र पाषाणाश्च खगेश्वर ।। ३ ।।

मच्चिह्नचिह्निताश्चैव तरवो धरणीतले ।
नराणामपि पक्षीन्द्र किंचित्कालनिवासिनाम् ।। ४ ।।

सर्वास्थिषु भवेचक्रं मस्तके स्पष्टमेव च ।
एवं क्षेत्रस्य माहात्म्यं मृगपक्ष्यादयस्तथा ।। ५ ।।

चक्रनद्युत्तरे मर्त्याः लभन्ते पुण्यमुत्तमम् ।
सालग्रामशिलास्तत्र नानामूर्तिसमन्विताः ।। ६ ।।

पूजनीयाः प्रयत्नेन चतुर्वर्गफलाप्तये ।
हिरण्यवज्रकीटेन निर्मितं चक्रमुत्तमम् ।। ७ ।।

---

* T. M. S. S. M. B. No. 2016 / D. 15358.

१. ये इति साधु ।

मठपद्मादिभेदेन चक्रं बहुविधं स्मृतम् ।
मूर्तयो द्विविधा ज्ञेयाः जलजाः स्थलजास्तथा ।। ८ ।।

जलस्थं कोमलं स्निग्धं तटस्थं परुषं स्मृतम् ।
मूर्तयः पुष्टिदाः स्निग्धाः मोक्षदाः परुषाः स्मृताः ।। ९ ।।

श्यामा कृष्णा तथा पीता श्वेता रक्ता च कापिला ।
अतिरक्ता धूम्रवर्णा विवर्णा मधुपिङ्गला ।। १० ।।

बहुवर्णा कलङ्का च तथा सद्दिग्ध[1]वर्णिनी ।
इत्यादि वर्णभेदेन ज्ञेया नानाविधाः शिलाः ।। ११ ।।

स्निग्धं सूक्ष्मं शीतलाङ्गं वृत्तमुन्नतमस्तकम् ।
श्यामं कृष्णं तथा पीतं बहुवर्णं च लोहितम् ।। १२ ।।

वामचक्रं मध्यचक्रं चारुचक्रं सगह्वरम् ।
वनमालाधरं वृत्तवदनं कमलादिमत् ।। १३ ।।

एता ग्राह्या विशेषेण साधकस्य शुभप्रदाः ।
स्निग्धं सिद्धिप्रदं नित्यं सूक्ष्मं दिव्यफलप्रदम् ।। १४ ।।

सन्तोषदं शीतलाङ्गं वृत्तं सिद्धिप्रदायकम् ।
सर्वसिद्धिकरं श्यामं कृष्णं कीर्तिकरं सदा ।। १५ ।।

श्वेतं मोक्षप्रदं चैव पीतं धनकरं तथा ।
सुखदं बहुवर्णं च रक्तं राज्यकरं तथा ।। १६ ।।

---

१. सन्दिग्ध . . . इति साधु

वामचक्रं मध्यचक्रं पुत्रपौत्राभिवृद्धिदम् ।
कीर्तिप्रदं चारुचक्रमानन्दं स्यात्सगह्वरम् ।। १७ ।।

वनमालायुतं चापि दारसौभाग्यदायकम् ।
वृत्ताननं भुक्तिकरं वाचि कौशलदायकम् ।। १८ ।।

पद्मादि युक्तं सौभाग्यधान्यधेनुफलप्रदम् ।
न स्थूलं न कृशं भिन्नं नातिकृष्णं न कर्कशम् ।। १९ ।।

स्थिरासनयुतं चापि राज्यभोगापवर्गदम् ।
चक्रैस्तु केवलैर्युक्तं पञ्चभिस्समलङ्कृतम् ।। २० ।।

वनमालायुतं चक्रं तत्रास्ते श्रीसहायवान् ।
जंब्वामलकतुल्या या सूक्ष्मचक्रद्वयान्विता ।। २१ ।।

तस्यामेव सदाकालं श्रिया सह वसाम्यहम् ।
यथा यथा शिला सूक्ष्मा फलाधिक्यं तथा तथा ।। २२ ।।

क्षीरे वा तण्डुले वापि सालिग्रामं विवेशयेत् ।
दृष्ट्वाधिक्यं तयोः किंचिद्गृण्हीयाद्बुद्धिमान्नरः ।। २३ ।।

अथाग्राह्यान्प्रवक्ष्यामि सालिग्रामान् स्वरूपतः ।
करालं विकरालं च तिर्यग्वक्रं विदिङ्मुखम् ।। २४ ।।

पृथुवक्त्रं चोर्ध्ववक्त्रमधःपार्श्वशिरोमुखम् ।
वक्रतुण्डं बद्धचक्रमचक्रं वक्रचक्रकम् ।। २५ ।।

भग्नचक्रं भुग्नचक्रं तथा विषमचक्रकम् ।
अव्यक्तं बहुचक्रं च पंक्तिचक्रं विवर्णकम् ।। २६ ।।

धूम्रातिरक्ता कपिला कलङ्का मधुपिङ्गला ।
सन्दिग्धवर्णं स्फुटितं भग्नोष्ठं बन्धितं तथा ।। २७ ।।

अन्तःस्फुटितभुग्नं च दर्दुरं भिन्नप्रस्तकम् ।
अतिस्थूलं चातिह्रस्वमन्तस्सलिलधारिणम् ।। २८ ।।

त्रिकोणं बहुरेखाढ्यं चिह्नहीनं चलासनम् ।
अर्धमुन्नतमुष्णं च दग्धपृष्ठं[1] च रूक्षकम् ।। २९ ।।

छिद्रासनं बहुच्छिद्रं स्फोटं चैहिकवाच्छिभिः ।
पूजायां वर्जनीयं स्यान्निष्कामश्चेन्न दुष्यति ।। ३० ।।

करालं कुलनाशं स्याद्विकरालमरिष्टदम् ।
कार्यविघ्नकरं तिर्यं[2]ग्विदिक्चक्रं तु शोकदम् ।। ३१ ।।

अपुष्टिदं स्थूलचक्रमूर्ध्वमुच्चाटनं स्मृतम् ।
अधोवक्त्रं कार्यवक्त्रं[3] क्षयरोगविधायकम् ।। ३२ ।।

शिरोवक्त्रं पुत्रवृद्धिप्रतिबन्धकमार्तिदम् ।
दुःखदं वक्रतुण्डं च मित्रघ्नं बहुचक्रकम्[4] ।। ३३ ।।

अचक्रं सर्वशून्यं च वक्रचक्रं भयप्रदम् ।
पापदं भग्नचक्रं च स्तेयदं भुग्नचक्रकम् ।। ३४ ।।

विषदं चक्रविषमं बहुचक्रं कुलक्षयम् ।
पंक्तिचक्रं कुलघ्नं स्याद्विवर्णा कुलनाशिनी ।। ३५ ।।

---

१. दग्ध घृष्टं . . . इति पाठान्तरम् । २. विदिग्वक्त्रं इत्यपि ।
३. पार्श्ववक्त्रम् इत्यपि पाठः । ४. बद्धचक्रकम् इत्यपि पाठः ।

कपिला पत्निहानिस्स्यात्कलङ्का क्षयकारिणी ।
मधुवर्णं मध्यमं स्याद्भितिस्संदिग्धवर्णिनी ।। ३६ ।।

स्फुटितं पुत्रनाशाय भग्नोष्ठं बुद्धिनाशनम् ।
आस्थानभङ्गदं भग्नं दर्दुरं क्लेशदं स्मृतम् ।। ३७ ।।

स्मयापहं निम्नशीर्षं अतिस्थूलं धनापहम् ।
अतिह्रस्वमपूजार्हं त्रिकोणं बन्धुनाशनम् ।। ३८ ।।

बहुरेखाङ्कितं दद्यादसत्यं जनसंसदि ।
सुकृतघ्नमचिह्नं च स्थाननाशं चलासनम् ।। ३९ ।।

कुलवृद्धिविनाशाय चार्धमुन्नतमीरितम् ।
चित्तदाहदमुष्णं च दग्धं मृत्युभयप्रदम् ।। ४० ।।

उद्वेगदायकं रूक्षं छिद्रपृष्ठं तु रोगदम् ।
पैशुन्यदं बहुच्छिद्रं स्फोटमायुष्यनाशनम् ।। ४१ ।।

एतत्त्याज्यफलं प्रोक्तं द्वारमानमथोच्यते ।
वृत्तसूत्राष्टमो भागः उत्तमं वक्त्रलक्षणम् ।। ४२ ।।

मध्यमं तु चतुर्भागं कनीयांसं त्रिभागकम् ।
क्षेत्रं तु त्रिविधं प्रोक्तं मूर्तितो वर्णतस्तथा ।। ४३ ।।

मिश्रलक्षणतश्चेति विज्ञातव्यं विचक्षणैः ।
वामनानामच्युतं स्याच्छ्रीधराणां च वामनम् ।। ४४ ।।

क्षेत्रं वाराहमूर्तेस्तु श्रीधरं त्वखिलप्रदम् ।
हयग्रीवस्य वाराहं लक्ष्मीक्षेत्रमथापि वा ।। ४५ ।।

क्षेत्रं नारायणं ज्ञेयमन्येषां क्रमशः स्मृतम् ।
कपिलो नारसिह्मश्च वामनस्त्वतसीप्रभः ।। ४६ ।।

वासुदेवः सितो ज्ञेयः रक्तस्संकर्षणः स्मृतः ।
दामोदरं तु नीलाभं अनिरुद्धं तथैव च ।। ४७ ।।

श्यामं नारायणं प्रोक्तं कृष्णवर्णं तु वैष्णवम् ।
बहुवर्णमनन्तं च श्रीधरं पीत उच्यते ।। ४८ ।।

लक्षणान्तरयोगेन तत्तत्क्षेत्रमुदाहृतम् ।
अनेकमूर्तयस्सन्ति तत्तल्लक्षणलक्षिताः ।। ४९ ।।

वैलक्षण्यं विशेषेण ज्ञातुं शक्यं न वै कलौ ।
वर्णरूपाद्यवयवैः प्रमाणबिललाञ्छनैः ।। ५० ।।

द्वारदेशविभेदेन भेदः केषाञ्चिदुच्यते ।
चक्रवक्त्रशिलाशुद्धिसंपत्तावुक्तलक्षणैः ।। ५१ ।।

कैश्चिन्न्यूनापि सा मूर्तिरुत्तमा सिद्धिदायिनी ।
वासुदेवो विप्रजनैरुपास्यः पूजने तथा ।। ५२ ।।

संकर्षणः क्षत्रियस्य प्रद्युम्नो वैश्यपूजितः ।
अनिरुद्धस्तु शूद्राणां पूज्यस्सर्ववरप्रदः ।। ५३ ।।

विप्राणां मूर्तयः सर्वाः पूजनीयाः प्रयत्नतः ।
क्षत्रियस्य त्रयः पूज्याः वैश्यस्य द्वयमेव च ।। ५४ ।।

शूद्रस्यैकं भवेत्तार्क्ष्य सर्वदा सर्वसिद्धये ।
सालग्रामाः समाः पूज्याः विषमा न कदाचन ।। ५५ ।।

विषमे त्वेक एव स्यात्समे द्वौ न कदाचन ।
एते सामान्यतः प्रोक्ताः सालग्रामगुणागुणाः ।। ५६ ।।

विशिष्य तद्वर्णनाय उद्देशः क्रियतेऽधुना ।
मत्स्याद्याः केशवाद्याश्च हयास्यः कपिलस्तथा ।। ५७ ।।

यज्ञो दत्तः शिंशुमारः मुकुन्दो हंस एव च ।
परमहंसश्च वैकुण्ठः पुण्डरीकाक्ष एव च ।। ५८ ।।

लक्ष्मीपतिर्देवदेवो वटपत्रशयस्तथा ।
विश्वम्भरो विश्वरूपो गरुडध्वज एव च ।। ५९ ।।

पीताम्बरधरश्चैव सत्यवीरस्त्रवस्तथा ।
बहुरूपी पुण्डरीकः पारिजातः सुदर्शनः ।। ६० ।।

अमृताहरणश्चक्रपाणिर्नारायणस्तथा ।
जगद्योनिस्तथानन्त अव्ययो हरिमूर्तयः ।। ६१ ।।

त्रिमूर्तिर्हरिपूर्वश्च हरः शङ्करपूर्वकः ।
नारायणः स्वयम्भुश्च परमेष्ठी चतुर्मुखः ।। ६२ ।।

पितामहः स्वर्णगर्भो गरुडः शेष एव च ।
नरश्च बलरामश्च त्रिरामो हेहयाधिपः ।। ६३ ।।

शिवनाभिरघोरश्च सद्योजातस्तथैव च ।
वामदेवो महेशानस्तत्पुमांश्च तथैव च ।। ६४ ।।

सूर्यमूर्तिरिति प्रोक्ता एकाशीतिविधाः शुभाः ।
मूर्तयो लक्षणं तासां दर्शयिष्ये पृथक् पृथक् ।। ६५ ।।

।। अथ मत्स्यमूर्तिलक्षणम् ।।

नानावर्णसमोपेता कांस्यवर्णयुतापि वा ।
दीर्घाकारयुता स्निग्धा द्वारमध्ये द्विचक्रयुक् ।। ६६ ।।

चक्रमेकं पुच्छभागे दक्षिणे शफराकृतिः ।
वामे प्रदृश्यते रेखा मत्स्यमूर्तिश्शुभप्रदा ।। ६७ ।।

मस्त्यरूपन्तु देवस्य दीर्घाकारन्तु यद्भवेत् ।
चक्रत्रयसमायुक्तं कांस्यं वर्णं सुशोभनम् ।। ६८ ।।

मत्स्याकृतिमुखाकारं मुखे दृश्यत्सुचक्रकम् ।
श्रीवत्सबिन्दुमालाढ्यं मत्स्यमूर्तिं शुभं विदुः ।। ६९ ।।

।। इति मत्स्यमूर्तिलक्षणम् ।।

।। अथ कूर्ममूर्तिलक्षणम् ।।

चतुर्धा कूर्ममूर्तिश्च तस्या लक्षणमुच्यते ।
कूर्मः स्यादुन्नतः पृष्ठे श्वेताभो गोखुरान्वितः ।। ७० ।।

विख्यातो दुर्लभस्सर्वमनोरथफलप्रदः ।
बिन्दुत्रयान्विता शङ्खयुता चक्रयुतापि वा ।। ७१ ।।

दीर्घदक्षिणवामा स्याद्भानोर्वलयपञ्चकैः ।
भूषिता कूर्ममूर्तिः स्याद्दुर्लभा सर्वकामदा ।। ७२ ।।

वृत्तायता कूर्ममूर्तिः कनकच्छविसंयुता ।
स्नुहिपुष्पाकृतिर्वापि चक्रस्योभयपार्श्वके ।। ७३ ।।

कूर्ममूर्तिः खगेशान सर्वकामफलप्रदा ।
वर्तुला मकराकार दीर्घद्वारा खगेश्वर ।। ७४ ।।

स्थिरासना ततः पृष्ठे उन्नता नीललोहिता ।
कूर्ममूर्तिरिति ख्याता पुत्रपौत्राभिवृद्धिदा ।। ७५ ।।

नाभिचक्रयुता रम्या कूर्माकारा तु पार्श्वतः ।
कूर्ममूर्तिः खगेशान दुर्लभा सर्वकामदा ।। ७६ ।।

तुरङ्गममुखाकारो वनमालाब्जचक्रवान् ।
श्यामलो हेमबिन्दुश्रीर्महाकूर्मस्स उच्यते ।। ७७ ।।

वर्तुलः कमलाकारो वनमालाब्जचक्रवान् ।
पालाशो हेमबिन्दुश्रीर्महाकूर्मस्स उच्यते ।। ७७ ।।

बिन्दुत्रयसमायुक्तं चक्रवच्छङ्खलाञ्छनम् ।
सुदीर्घं दक्षिणास्त्रं च तत्र चक्रेण चिह्नितम् ।। ७९ ।।

वृत्तलक्षणसंयुक्तं भानोर्वलयसंयुतम् ।
कूर्ममूर्तिस्सचक्रं तु दुर्लभं सर्वकामदम् ।। ८० ।।

बिन्दुत्रयसमायुक्तं कांस्यवर्णं सुशोभनम् ।
कूर्मस्तथोन्नतं पृष्ठे वर्तुलावर्तलाञ्छनः ।। ८१ ।।

हरितं वर्णमाधत्ते कौस्तुभेन सुचिह्नितम् ।
तत्तल्लक्षणसंयुक्तं भानोर्वलयपञ्चकम् ।। ८२ ।।

कूर्ममूर्तिरधोवक्त्रं दुर्लभं सर्वकामदम् ।
स्थूलं च निबिडाकारं श्यामवर्णं सुचक्रकम् ।
खर्जुरं वाथ कपिलं श्यामं वा कूर्ममुच्यते ।। ८३ ।।

।। इति कूर्ममूर्तिलक्षणम् ।।

।। अथ वराहमूर्तिलक्षणम् ।।

दक्षपार्श्वस्थिते चक्रे समे लग्ने प्रदेशतः ।
वनमालायुतो लक्ष्मीवराहः परिकीर्तितः ।। ८४ ।।

अतसीकुसुमप्रख्यं नीलोत्पलनिभं तु वा ।
दीर्घाकारं तु तद्दीर्घद्वारयुक्तं सपञ्जरम् ।। ८५ ।।

पृष्ठोन्नतं तु दीर्घास्यं वामतश्चक्रमुन्नतम् ।
पृष्ठे रेखासमायुक्तं वाराहाकृतिरेव वा ।। ८६ ।।

आस्यमात्रं वा तार्क्ष्यपदलाङ्गूलकं तथा ।
दृश्यते कौस्तुभाकाररेखा पृष्ठे च पार्श्वके ।। ८७ ।।

वराहमूर्तिरित्युक्ता राज्यलक्ष्मीप्रदा नृणाम् ।
पुत्रपौत्रप्रदा वित्तभूप्रदा ज्ञानवर्धिनी ।। ८८ ।।

अधश्चक्राङ्कितलसदेकदंष्ट्रं समुद्धृतम् ।
अंकुशाकारवदनं वाराहं भूप्रदं शुभम् ।। ८९ ।।

सुखासीनं सुपीताभं सूक्ष्मरन्ध्रं सुचक्रकम् ।
सुदंष्ट्राभांस्तमोपेतं वाराहं धरणीप्रदम् ।। ९० ।।

दीर्घास्यं श्यामलाकारं पृथ्वीवलयवेष्टितम् ।
छत्रचामररेखाढ्यं कल्पवृक्षसमन्वितम् ।। ९१ ।।

द्वारदेशे लसच्चक्रं वाराहं परिचक्षते ।
अधोवक्त्रमतिस्निग्धं पृष्ठोन्नतसुपीतकम् ।। ९२ ।।

वाराहं धान्यफलदं सर्वैराराधनीयकम् ।
सूचीमुखं सूक्ष्मचक्रमुन्नतं मस्तकोपरि ।। ९३ ।।

त्रिबिन्दुभिः परिवृतं वाराहममृतप्रदम् ।
घोणरूपैर्वराहाख्या चतुर्लाञ्छनशोभिता ।। ९४ ।।

दद्यात्सा मोक्षसंसिद्धिं ब्रह्मचर्येण पूजिता ।
दीर्घघोणा समायुक्तमेकदंष्ट्रं सुनिर्मलम् ।। ९५ ।।

वनमालायुतं रम्यं श्वेतं वाराहमुच्यते ।
दीर्घास्यं श्यामलाकारं पृथ्वीवलयभूषितम् ।। ९६ ।।

द्वारदेशे लसच्चक्रं वाराहं परिचक्षते ।
वाराहं शक्तिलिङ्गं तु चक्रे च विषमे स्थिते ।। ९७ ।।

इन्द्रनीलनिभं स्थूलं त्रिरेखालाञ्छितं परम् ।
वाराहः स च विज्ञेयः सूक्ष्मचक्रेन्तरे स्थिते ।। ९८ ।।

तस्य संपूजनाद्देही प्राप्नोति मनसेप्सितम् ।

।। इति वाराहमूर्तिलक्षणम् ।।

।। अथ नृसिह्ममूर्तिलक्षणम् ।।

त्रयोदशप्रकाराः स्युः नारसिह्मस्य मूर्तयः ।। ९९

तत्र तु द्विविधौ लक्ष्मीनृसिह्माख्यविदारणौ ।
नृसिह्मः कपिलो ज्ञेयः स्थूलचक्रस्सुदंष्ट्रकः ।। १०० ।।

त्रिबिन्दुः पञ्चबिन्दुर्वा ब्रह्मचर्येण पूजितः ।
विवृतास्यं वामचक्रं वर्तुलं कपिलप्रभम् ।। १०१ ।।

नारसिह्मं गृहस्थानां भीतिदं बिन्दुभिर्युतम् ।
द्विचक्रं च बृहच्चक्रं कपिलं कनकप्रभम् ।। १०२ ।।

लक्ष्मीनृसिह्मं विज्ञेयं ब्रह्मचारिभिरर्चितम् ।
वामपार्श्वस्थिते चक्रे कृष्णवर्णं सबिन्दुकम् ।। १०३ ।।

लक्ष्मीनृसिह्मं विज्ञेयं भुक्तिमुक्तिफलप्रदम् ।
सप्तचक्रं बहुमुखं समन्तात्स्वर्णभूषितम् ।। १०४ ।।

सर्वतोमुखमाख्यातं बहुवर्णन्तु मोक्षदम् ।
बहुचक्रं सूक्ष्मरन्ध्रं बहुवर्णं बहूदरम् ।। १०५ ।।

पातालनारसिह्माख्यं भिक्षूणाममृतप्रदम् ।
अस्पष्टचक्रमालास्यमल्पभारं महोदरम् ।। १०६ ।।

तत्कुक्षिनारसिह्माख्यं वनवासिभिरर्चितम् ।
अन्तश्चक्रं बृहद्द्वारं दक्षिणोन्नतमस्तकम् ।। १०७ ।।

विदारणमिति ख्यातं दंष्ट्राभ्यामुपशोभितम् ।
बहुच्छिद्रं भिन्नचक्रं सुवर्णकनकान्वितम् ।। १०८ ।।

तच्छिद्रराक्षसं ज्ञेयं नृसिह्मं गृहदाहकम् ।
सुवर्णबिन्दुभिर्युक्तं बृहच्चक्रं बृहन्मुखम् ।। १०९ ।।

व्यक्तदंष्ट्रं नृसिह्मं तद्यतीनां प्रीतिदं सदा ।
द्विचक्रं द्विमुखं स्थूलं दूर्वाभं चोन्नतं शिरः ।। ११० ।।

दारिद्र्यफलदं पुसां विद्युज्जिह्वनृसिह्मकम् ।
पुरः पार्श्वे च पृष्ठे वा चक्राभ्यामुपशोभितम् ।। १११ ।।

अन्तर्मुखमिति ख्यातमर्चकानां विमुक्तिदम् ।
स्थूलचक्रद्वयं मध्ये गुञ्जालाक्षालवर्णकम् ।। ११२ ।।

स्फुटितं विषमं चक्रं नारसिह्मं च कापिलम् ।
संपूज्य मुक्तिमाप्नोति संग्रामे विजयी भवेत् ।। ११३ ।।

सूक्ष्मरन्ध्रं द्विचक्रं च वनमालाविभूषितम् ।
तद्बालनारसिह्माख्यं नृणां संसारमोक्षदम् ।। ११४ ।।

दीर्घास्यः कपिलाकारो दीर्घचक्रो महाद्युतिः ।
नारसिह्म इति ख्यातो योग्यो मस्करिपूजनम् ।। ११५ ।।

।। इति नृसिह्ममूर्तिलक्षणम् ।।

।। अथ वामनमूर्तिलक्षणम् ।।

वर्तुलश्चातिह्रस्वश्च वामनः परिकीर्तितः ।
तं तु पञ्चप्रभेदेन वक्ष्ये मूलानुसारतः ।। ११६ ।।

मध्यचक्रं चातिह्रस्वं अतिस्निग्धमकार्ष्णिकम् ।
स्पष्टचक्रं वामनं स्यान्नृणामीप्सितकामदम् ।। ११७ ।।

अतसीकुसुमप्रख्यं किञ्चिदुन्नतमस्तकम् ।
तद्वामनं कामदं स्यात्किञ्चिदस्पष्टचक्रकम् ।। ११८ ।।

वर्तलं नीलमेघाभं वनमालाविभूषितम् ।
सूक्ष्मरन्ध्रं बृहत्कुक्षिवामनं भुवि दुर्लभम् ।। ११९ ।।

वामनाख्यो भवेद्देवः ह्रस्वा यस्य भवेत्तनुः ।
ऊर्ध्वचक्रं सुचक्रं च सोर्चितोर्ध्वप्रदो नृणाम् ।। १२० ।।

सुवर्णबिन्दुसहितं ह्रस्वचक्रं च वर्तुलम् ।
सूक्ष्मद्वारं स्निग्धवर्णं वामनं परिचक्षते ।। १२१ ।।

इन्द्रनीलनिभाकारं वनमालाम्बुजोज्ज्वलम् ।
ह्रस्वं च वर्तुलं चैव वामनं परिचक्षते ।। १२२ ।।

एतल्लक्षणसंयुक्तं दधिबुद्बुदशोभितम् ।
वामनं नीलरक्ताभं वदन्ति दधिवामनम् ।। १२३ ।।

ऊर्ध्वचक्राग्रविलसद्दधिबुद्बुदशोभितम् ।
वामनं नीलरक्ताभं वदन्ति दधिवामनम् ।। १२४ ।।

अधश्चक्राग्रविलसद्दधिबुद्बुदशोभितम् ।
मूर्तिश्रियं विधातृस्याद्दधिगोपालवामनम् ।। १२५ ।।

वर्तुलं स्निग्धमत्यन्तस्पष्टचक्रसमन्वितम् ।
ह्रस्वमुन्नतिमच्चैव दीर्घास्यमतिगह्वरम् ।। १२६ ।।

स्फुरद्द्विरेखावलयं नाभिस्तस्योन्नता भवेत् ।
चक्रस्योभयपार्श्वे तु स्नुहिपुष्पाकृतिर्भवेत् ।। १२७ ।।

केसराभन्तु वै तार्क्ष्य दृश्यते चक्रपार्श्वयोः ।
गृहिणां वामनं श्रेष्ठं सुखसौभाग्यदायकम् ।। १२८ ।।

अन्नवृद्धिं प्रजावृद्धिं भूलाभं दिशति ध्रुवम् ।
वर्तुलश्चातिह्रस्वश्च वामनः परिकीर्तितः ।। १२९ ।।

अन्नपानसमृद्धिश्च सर्वसौभाग्यदायकः ।
आरोग्यसुखदश्चैव वामनः परिकीर्तितः ।। १३० ।।

कदम्बकुसुमाकारो रेखापञ्चकसंयुतः ।
वर्तुलश्चातिह्रस्वश्च वामनः परिकीर्तितः ।। १३१ ।।

वृत्ताकारच्छत्रशिराः श्रीभूमिन्दुसमुज्ज्वलः ।
हेमधूलिपरिक्षिप्तो हेमाङ्गं वामनं विदुः ।। १३२ ।।

सितकृष्णारुणोपेतं दीर्घाकारं बृहद्बिलम् ।
भित्तिभागगतं चक्रं वामे वा दक्षिणेऽपि वा ।। १३३ ।।

।। इति वामनमूर्तिलक्षणम् ।।

।। अथ परशुराममूर्तिलक्षणम् ।।

जामदग्न्यस्तु भगवान् द्विविधः परिकीर्तितः ।
सितकृष्णारुणोपेतं दीर्घाकारं बृहद्बिलम् ।। १३४ ।।

भित्तिभागगतं चक्रं वामे वा दक्षिणेऽपि वा ।
चक्रभागे भवेद्बिन्दुः परश्वाकृतिरेव वा ।। १३५ ।।

पृष्ठे वा पार्श्वतो वाऽपि रेखा दंष्ट्राकृतिर्भवेत् ।
जामदग्न्यस्तु भगवान् अर्चनीयो महीभृताम् ।। १३६ ।।

लसत्परशुरेखाढ्यो दूर्वाश्यामस्तथोन्नतः ।
नाभिचक्रयुतश्चैव रामस्स्याज्जमदग्निजः ।। १३७ ।।

केवलं लाञ्छितः पृष्ठे परश्वाकृतिरेखया ।
स जामदग्न्यो भगवान् शान्ताख्यः शान्तिदोर्चितः ।। १३८

।। इति परशुराममूर्तिलक्षणम् ।।

।। अथ राममूर्तिलक्षणम् ।।

अष्टधा राममूर्तिः स्याद्वीररामादिभेदतः ।
सीतारामस्तु तत्रापि द्विविधः परिकीर्तितः ।। १३९ ।।

कोदण्डि कुक्कुटाण्डाभं श्यामलं पृष्ठमुन्नतम् ।
रेखाद्वयसमोपेतं द्वारदेशे खगेश्वर ।। १४० ।।

धनुराकृतिका रेखा दृश्यते पार्श्वतोऽपि वा ।
पृष्ठतो वा भवेद्रामो दशकण्ठकुलान्तकः ।। १४१ ।।

बाणतूणीरचापाढ्यः कुण्डलस्रक्समन्वितः ।
सूक्ष्मकेसरचक्राढ्यो वीररामः श्रियावहः ।। १४२ ।।

पृष्ठभागे पञ्चरेखा चापबाणौ च पार्श्वतः ।
स बालरामो विज्ञेयः पुत्रदायी न संशयः ।। १४३ ।।

जम्बूफलसमाकारं कृष्णवर्णं सबिन्दुकम् ।
पृष्ठे सुषिरमारभ्य वक्त्रे मकरकुण्डलम् ।। १४४ ।।

ललाटे हेमबाणस्तु बिन्दुनापि समन्वितम् ।
गोपालक्षेत्र उत्पत्त्या सदा रामस्य लक्षणम् ।। १४५ ।।

कलिनाशकरं प्रोक्तं सर्वज्ञानफलप्रदम् ।
अपुत्रो लभते पुत्रं सर्वमङ्गलकारणम् ।। १४६ ।।

दिव्यबाणेन संयुक्ताः चापतूणीरसंयुतः ।
कराळवदनो रक्तबिन्दुयुक् चक्रशोभितः ।। १४७ ।।

स स्याद्विजरामाख्यः केसरोपेतचक्रकः ।
मूर्ध्नि माला धनुर्बाणौ पार्श्वे खुरयुतस्तथा ।। १४८ ।।

हृष्टराम इति ख्यातो भुक्तिमुक्तिफलप्रदः ।
धनुषैकेन संयुक्तो वर्तुलः किञ्चिदायतः ।। १४९ ।।

कोदण्डरामनामा स्याच्छुद्धनीलाम्बुदप्रभः ।
एकचक्रा तु वदने कृष्णवर्णा सुशोभना ।। १५० ।।

सा राममूर्तिर्विज्ञेया पूजकस्य कवित्वदा ।
रेखाकारधनुर्बाणं स्थूलदीर्घं सबिन्दुकम् ।। १५१ ।।

नाभिचक्रं बहुच्छिद्रं रामं दाशरथिं विदुः ।
वदनेऽप्येकवदनः चतुश्चक्रोऽम्बरप्रभः ।। १५२ ।।

चापबाणाङ्कुशच्छत्रध्वजचामरसंयुतः ।
वनमालाधरो देवः सीतारामः प्रकीर्तितः ।। १५३ ।।

सर्वसौभाग्यदश्चापि सर्वत्र विजयप्रदः ।
द्वारद्वये चतुश्चक्रो वामतश्चैकचक्रवान् ।। १५४ ।।

बाणतूणीरचापाढ्यस्सीतारामस्स्रगन्वितः ।
सर्वसौभाग्यदश्चापि सर्वत्र विजयप्रदः ।। १५५ ।।

सव्यापसव्यतूणीरसुषिराभ्यां विराजितम् ।
सीताचक्रसमोपेतं सीतारामभिति स्मृतम् ।। १५६ ।।

पार्श्वे सायुधसन्मुखं ससुषिरं पृष्ठे च कल्पद्रुमं
पार्श्वे भूषितचक्रलाञ्छितशरं धातुत्रयं सुस्मितम् ।
सीतारामसमाख्यया सुविदितं लोकत्रये दुर्लभं
षट्चक्राङ्कितनीलपीतसहितं साम्राज्यमुक्तिप्रदम् ।।

द्वारद्वये चतुश्चक्रः श्यामवर्णः स्रगन्वितः ।
कोदण्डी कुक्कुटाण्डाङ्गः बाणभृखण्डतूणवान् ।। १५८

पृष्ठचक्री शिरश्चक्री सीतारामः प्रकीर्तितः ।
पूर्वभागे त्रिवदनः पार्श्वे चक्रेण संयुतः ।। १५९ ।।

सिंहासनसमासीनो रामः परिजनैस्सह ।
पट्टाभिराम इत्युक्तः राज्यलक्ष्मीप्रदो नृणाम् ।। १६० ।।

द्वारद्वये चतुश्चक्रो यत्र द्वित्रितयस्तथा ।
वनमाला पुष्कला च बाणतूणीरसंयुतः ।। १६१ ।।

सीताभरतशत्रुघ्नलक्ष्मणप्राणसेवितः ।
स्पष्टचक्रः स्थिरासीनः छत्रचामरलाञ्छनः ।। १६२ ।।

अभिषिक्तो महारामः धान्यधेनुधनप्रदः ।
मध्यमं रामचक्रं हि वामे सीतारमन्वितम् ।। १६३ ।।

दक्षिणे लक्ष्मणोपेतं पार्श्वचक्रे सगह्वरे ।
शत्रुघ्नभरतोपेतं आसनोपरि चाग्रतः ।। १६४ ।।

एकचक्रे हनु(नू?)मता सुग्रीवेण च सेवितम् ।
जम्बूफलसमाकारं तूणीरद्वयशोभितम् ।। १६५ ।।

ध्वजचामरसंयुक्तं बाणबाणासनोज्ज्वलम् ।
सुवर्णबिन्दुसहितं कृष्णमुन्नतमस्तकम् ।। १६६ ।।

पट्टाभिषेकं श्रीरामं परिवारसमन्वितम् ।
आयुरारोग्यदं पुंसां पुत्रपौत्राभिवृद्धिदम् ।। १६७ ।।

श्रीकरं सर्वपापघ्नं सर्वत्र विजयप्रदम् ।। १६८ ।।

बाणतूणीरचापाढ्यं शान्तं भुषितचक्रकम् ।
शोकराम इति ख्यातं वर्णतस्सितधूसरम् ।। १६९ ।।

स एव युतचक्राढ्यः योगराम इतीरितः ।
पूर्वभागे त्रिवदनः त्रिकोणाकृतिरेव च ।। १७० ।।

श्रीराम इति विख्यातः सचिह्नोऽचिह्न एव वा ।
बलं प्रयच्छति सदा सर्वत्र विजयप्रदः ।। १७१ ।।

कुक्कुटाण्डसमोपेतः अधोवक्त्रस्सकुण्डलः ।
द्वारदेशसमासक्तकल्पवृक्षसुचिह्नितः ।। १७२ ।।

वामपार्श्वे शिरश्चक्ररेखालाञ्छनसंयुतः ।
सीतारामस्स विज्ञेयः भुक्तिमुक्तिफलप्रदः ।। १७३ ।।

कोदण्डकुक्कुटाण्डाभं बाणतूणीरसंयुतम् ।
गोखुरीपुच्छचक्री च सीतारामः स उच्यते ।। १७४ ।।

तूणीराकृतिमच्छ्यामं चापद्वयशरान्वितम् ।
नानाध्वजसमोपेतं रेखाचामरसंयुतम् ।
श्रीरामपञ्जरं ज्ञेयं सर्वत्र विजयप्रदम् ।। १७५ ।।

।। इति राममूर्तिलक्षणम् ।।

।। अथ बलराममूर्तिलक्षणम् ।।

हलरेखामुसलवान् शुक्लांभोधिनिभात्मवान् ।
मधुबिन्दुधरः श्रीमान् रामं सङ्कर्षणं विदुः ।। १७६ ।।

स्थूलचक्रो भवेद्देवो हरिलोहितवर्णवान् ।
बलभद्रो भवेद्देवो गोत्रकीर्तिविवर्धनः ।। १७७ ।।

शङ्खचक्रगदाकारो मध्यतो यत्र दृश्यते ।
सङ्कर्षणो नाम देवः संस्मृत्या जायते पदम् ।। १७८ ।।

दीर्घाकारं बृहद्द्वारं पृथुचक्रं च यद्भवेत् ।
श्वेताम्बरहलं चिह्नं मुसलाकृतिरेव वा ।। १७९ ।।

नीलोत्पलप्रसूनाभं पृष्ठे वा चासनेऽपि वा ।
बलशाली भवेद्रामः वंशकोशविवर्धनः ।। १८० ।।

द्वितीयो वामचक्रस्तु रेखा चैव तु दक्षिणे ।
बलशाली भवेद्रामः लाङ्गलाङ्कितशोभनः ।। १८१ ।।

सर्वत्र रक्तवर्णः स्यात्पीतनीलाभवर्जितः ।
सुचक्रो वाऽसुचक्रो वा सीरपाणिश्शुभप्रदः ।। १८२ ।।

पीतवर्णधरो वक्त्रे धनुःपरशुलाङ्गलैः ।
अङ्कितो रामनाम्ना स्यात्सर्वमृत्युहरः शुभः ।। १८३ ।।

कदम्बकुसुमाकारबिन्दुना परिभूषितः ।
धनुर्बाणधरो रेखापद्मरेखासमन्वितः ।। १८४ ।।

पृष्ठभागे तथाच्छिद्रः पीतरेखासमन्वितः ।
रामो रामश्च रामेति दुर्लभः सर्वकामदः ।। १८५ ।।

।। इति बलराममूर्तिलक्षणम् ।।

।। अथ कृष्णमूर्तिलक्षणम् ।।

कृष्णमूर्तिप्रभेदास्तु त्रयोविंशत्समीरिताः ।
कृष्णः पीतः कृशतनुः भित्तिभागे तु चक्रयुक् ।।
द्वारतुल्यो भवेन्नाभिः कूर्चाकारस्तु पृष्ठतः ।। १८६ ।।

कृष्णो वृत्ताकृतिस्तार्क्ष्य सर्वेषां पापनाशनः ।
कृष्णो मध्योन्नतः पृष्ठे वर्तुले परिचिह्नितः ।। १८७ ।।

हरिद्राभं अधोभागे कौस्तुभेन तु लाञ्छितः ।
सा कृष्णमूर्तिर्विज्ञेया श्रीपादा कीर्तिवर्धिनी ।। १८८ ।।

उन्नतो मूर्ध्नि कृष्णाभः निम्नोधस्तात्त्रिबिन्दुलः ।
स बालकृष्णो विज्ञेयः दीर्घास्यः पुत्रभाग्यदः ।। १८९ ।।

दक्षादि वामपर्यन्तं मुखाधस्तात्सुशोभना ।
रेखा स्यात्कृष्णवर्णाढ्या बिन्दुद्वयविभूषिता ।। १९० ।।

कालीयमर्दनस्साक्षात्सर्वारातिविनाशनः ।
सव्यापसव्यरेखाभ्यां भूषितः सूक्ष्मचक्रकः ।। १९१ ।।

पार्श्वे मेरुयुतो देवः धनंजयविभुः शुभः ।
असिवर्णश्चनस्थूलः चक्रभागेऽतिशोभनः ।। १९२ ।।

वनमालावृतः पृष्ठे श्रीवत्सशुभलाञ्छनः ।
स्यमन्तकहरिज्ञेयः पुष्टिश्रीकीर्तिदो नृणाम् ।। १९३ ।।

रक्तबिन्दुद्वययुतः श्यामो दन्तिभुजासमः ।
रेखा दक्षिणतो वामे पुष्टिवद्दृढबिन्दुलः ।। १९४ ।।

चाणूरमर्दनाख्यः स्यात्सर्वशत्रुनिकृन्तनः ।
पूर्वभागैकवदनः पार्श्वैकवदनं भवेत् ।। १९५ ।।

कंसमर्दी भवेत्कृष्णो नीलाम्बरनिभः शुभः ।
समचक्रा द्वारदेशे कृष्णवर्णा सुशोभना ।। १९६ ।।

सा कृष्णमूर्तिर्विज्ञेया पूजिता सौख्यदायिनी ।
रेखापञ्चायुधधरं वनमालाविभूषितम् ।। १९७ ।।

अब्जचिह्नं सूक्ष्मचक्रं कृष्णमेवं प्रचक्षते ।
एतल्लक्षणसंयुक्तं दीर्घाकारं बहूदरम् ।। १९८ ।।

श्रीगोपालमिति प्राहुः सरेखावंशतालकम् ।
श्यामवर्णं महास्निग्धं छत्राकारं तथैव च ।। १९९ ।।

सूक्ष्मद्वारेण बिन्दूनां रक्तरेखासमन्वितम् ।
शीर्षपुष्करकञ्चैव महास्निग्धं च कोमलम् ।। २०० ।।

गोपालमूर्तिर्विज्ञेया दुर्लभा भुवनत्रये ।
कुक्कुटाण्डसमोपेतं श्रीकर्या वनमालया ।।
लाङ्गले वेणुचिह्नं च कुण्डलैः परिवेष्टितम् ।। २०१ ।।

लक्ष्मीगोपालकं ज्ञेयं दुर्लभं भुवनत्रये ।
पुत्रलाभं तथा मोक्षं भुक्तिं मुक्तिं च यच्छति ।। २०२ ।।

कृष्णोऽतिकृष्णो न स्थूलः चक्रे फेनाभिशोभितः ।
वनमालावृतः पृष्ठे श्रीवत्सशुभलाञ्छनः ।। २०३ ।।

दण्डशृङ्गयुतः पार्श्वे वेणुना शोभितो मुखे ।
स गोपाल इति प्रोक्तो गोभूधान्यधनप्रदः ।। २०४ ।।

यो गोपालः पार्श्वभागे तरुयुक्तश्च कार्ष्ण्यवान् ।
स स्यान्मदनगोपालो मालाकुण्डलशोभितः ।। २०५ ।।

पुत्रपौत्रधनैश्वर्यसर्वलोकैकवश्यदः ।
अर्धश्यामोऽर्धरक्तश्च शङ्खचक्रधनुर्धरः ।। २०६ ।।

दीर्घस्सुचक्रवान्वामे गोपालो मदनाह्वयः ।
दीर्घाकारः कृष्णवर्णो योऽर्धचन्द्रनिभाननः ।। २०७ ।।

स स्यात्सन्तानगोपालः पुत्रपौत्राभिवृद्धिदः ।
वर्तुलो मस्तके निम्नः पार्श्वे रजतबिन्दुलः ।। २०८ ।।

गोवर्धनाख्यगोपालो दीर्घरेखा तु दक्षिणे ।
सर्वकष्टविनाशाय भूधान्यधनवर्धनः ।। २०९ ।।

।। इति कृष्णमूर्तिलक्षणम् ।।

।। अथ बुद्धकल्किमूर्तिद्वयलक्षणम् ।।

अन्तर्गह्वरसंयुक्तं चक्रहीनं तु यद्भवेत् ।
निर्वाणबुद्धसंज्ञं स्याद्ददाति परमं पदम् ।। २१० ।।

रन्ध्रदृश्यद्वयोपान्ते अन्तश्चक्रद्वयान्वितम् ।
शिरोदिष्टार्धचक्रं च पार्श्वयोर्वापि दृश्यते ।। २११ ।।

नानावर्णमयं वापि बुद्धमूर्तिं प्रचक्षते ।
सहस्रबिन्दुसंयुक्तं सभचक्रसमन्वितम् ।। २१२ ।।

श्वेतवर्णमतिश्लक्ष्णं सर्वज्ञं श्रीकरं विदुः ।
अतिरक्तं सूक्ष्मबिलं पृष्ठचक्रं स्थिरासनम् ।। २१३ ।।

कृपणाकृतिरेखा स्याद्द्वारस्योपरि पृष्ठके ।
म्लेच्छनाशी भवेत्कल्की कलिकल्मषनाशनः ।। २१४ ।।

इन्द्रनीलनिभो दीर्घो वनमालाविभूषितः ।
अङ्कुशाकारवदनो धर्मदः कलिनिग्रहः ।। २१५ ।।

दीर्घास्यः कपिलाकारो दीर्घचक्रो महोदरः ।
हयरेखासमायुक्तो रेखाकुन्तायुधाकृतिः ।। २१६ ।।

श्वेतवर्णो दीर्घमुखः कल्कीति प्रोच्यते बुधैः ।

।। इति बुद्धकल्किमूर्तिद्वयलक्षणम् ।।

।। अथ केशवमूर्तिलक्षणम् ।।

सौभाग्यं केशवो दद्याच्चतुष्कोणो भवेत्तु सः ।। २१७ ।।

श्वेतवृत्तं समं पूर्वं अतिह्रस्वं च वर्तुलम् ।
मस्तकोन्नतिविख्यातं केशवं परिचक्षते ।। २१८ ।।

राजतैर्बिन्दुभिर्हैमैरन्वितं सूक्ष्मचक्रकम् ।
वनमालान्वितं श्यामं केशवाख्यं विदुर्बुधाः ।। २१९ ।।

।। इति केशवमूर्तिलक्षणम् ।।

।। अथ नारायणमूर्तिलक्षणम् ।।

नारायणोऽपि भगवान्लक्ष्यतेऽत्र चतुर्विधः ।
श्यामो नारायणो देवो नाभिचक्रस्तथोन्नतः ।। २२० ।।

दीर्घरेखात्रयोपेतो दक्षिणे सुषिरं पृथु ।
नीलाम्बुदसमाकारं चतुर्लाञ्छनशोभितम् ।। २२१ ।।

रेखात्रयसमायुक्तं नारायणमिति स्मृतम् ।
तमालदलसंकाशः स्वर्णपङ्कविलेपवान् ।। २२२ ।।

वीरनारायणो देवः श्वेतचक्रः सुशोभनः ।
मुसलायुधमालासिशङ्खचक्रगदान्वितः ।। २२३ ।।

रूपनारायणो देवो मुखे चापमुखं धनुः ।
सर्वसिद्धिकरो देवः सर्वकामफलप्रदः ।। २२४ ।।

ताटङ्कनासाभरणहारकेयूरलाञ्छनः ।
मायानारायणो देवः सर्वसिद्धिप्रदायकः ।। २२५ ।।

ध्वजवज्रांकितं पीतं एकचक्रं सुवर्तलम् ।
लक्ष्मीनारायणं देवं अभीष्टफलदं विदुः ।। २२६ ।।

नवदूर्वादलश्यामं वनमालाविभूषितम् ।
श्रीवत्सशङ्खचक्राढ्यं पञ्चायुधलसत्तनुम् ।। २२७ ।।

समसूक्ष्मलसच्चक्रं पङ्कजद्वयशोभितम् ।
सदा सुशीतलतनुं अनन्तमधिकोज्ज्वलम् ।। २२८ ।।

द्वारदेशे लसद्रेखा पक्षिराजसरेखकम् ।
लक्ष्मीनारायणं देवं दुर्लभं शीघ्रसिद्धिदम् ।। २२९ ।।

एतल्लक्षणसंयुक्तं शेषभोगसमन्वितम् ।
नारायणमिमं प्राहुः नारदेष्टफलप्रदम् ।। २३० ।।

गदाकृतिस्तथारेखा सा लभ्या मध्यदेशतः ।
द्विचक्रेण युतः पीतः वामचक्रं च वर्तुलम् ।। २३१ ।।

लक्ष्मीनारायणो देवः सर्वकामफलप्रदः ।
एकवक्त्रे चतुश्चक्रं वर्तुलं श्यामवर्णकम् ।। २३२ ।।

ध्वजवज्राङ्कुशोपेतो मालायुक्तः सबिन्दुकः ।
नातिह्रस्वोन्नतिस्थूलो लक्ष्मीनारायणः स्मृतः ।। २३३ ।।

तस्य दर्शनमात्रेण ह्यमीष्टफलमाप्नुयात् ।
पाञ्चजन्यं गदापद्मं यत्र यत्र स्त्रियं विदुः ।। २३४ ।।

कौस्तुभे श्रीकरे युक्तः श्रीकर्या वनमालया ।
चतुश्चक्रयुतो वापि द्वित्रिचक्रैकचक्रवान् ।। २३५ ।।

लक्ष्मीनारायणो देवः सर्वाभीष्टफलप्रदः ।
चतुश्चक्रं त्रिगम्भीरं दक्षिणे सुषिरं पृथु ।। २३६ ।।

वनमालाद्वयोपेतं गोखुरेण च मिश्रितम् ।
छत्राकारं दृढं स्निग्धं मध्यचक्रं दृढासनम् ।। २३७ ।।

लक्ष्मीनारायणाख्यं हि मूर्तीनामुत्तमोत्तमम् ।
ध्वजचक्राङ्कितं पीतं वामचक्रं तु वर्तुलम् ।। २३८ ।।

लक्ष्मीनारायणं देवं अभीष्टफलदं विदुः ।
सुवर्णबिन्दुसहितं ह्रस्वास्यं स्थिरमस्तकम् ।। २३९ ।।

जम्बूफलसमाकारं बिन्दुनोपरिपूरितम् ।
अतिवृत्तं सूक्ष्मयुक्तं चतुर्लांछनशोभितम् ।। २४० ।।

चतुश्चक्रांबुजाकारं मस्तके पद्मलक्षणम् ।
वृत्तं वर्तुलसङ्काशं लक्ष्मीनारायणं स्मृतम् ।। २४१ ।।

मुसलासिधनुर्मालाशङ्खचक्रगदांकितम् ।
लक्ष्मीनारायणं देवं मुखे नाभौ च नारद ।। २४२ ।।

लक्ष्मीनारायणो देवश्चतुर्भिश्चक्रकैर्युतः ।
यत्र तिष्ठति तत्क्षेत्रं अष्टैश्वर्यफलप्रदम् ।। २४३ ।।

अधश्चोर्ध्वं पार्श्वयोश्च चक्रैरप्युपशोभितम् ।
चतुर्भिर्मध्यसुषिरं लक्ष्मीनारायणं स्मृतम् ।। २४४ ।।

लक्ष्मीनारायणं स्निग्धं अञ्जनाचलसन्निभम् ।
नातिह्रस्वं न च स्थूलं वर्तुलं मध्यचक्रकम् ।। २४५ ।।

सुवर्णबिन्दुसंयुक्तं चतुश्चक्रैरलंकृतम् ।
वनमालापरिवृतं वदनेतरपार्श्वतः ।। २४६ ।।

तन्मूर्तिदर्शनात्पुंसां अष्टैश्वर्यफलं भवेत् ।
निम्नाकारं शिरश्चक्रसंवृतं शीतलाकृतिः ।। २४७ ।।

द्वारद्वये चतुश्चक्रं वामे वा दक्षिणेऽपि वा ।
श्रीवत्सशङ्खचक्राढ्यं पार्श्वे चणकपुष्पवत् ।। २४८ ।।

लक्ष्मीनारायणं देवं भुक्तिमुक्तिफलप्रदम् ।
गदाकृतिस्तत्ररेखा लक्ष्यते मध्यदेशतः ।। २४९ ।।

ध्वजवज्राङ्कुशोपेतं वामे चक्रचतुष्टयम् ।
दक्षिणे चक्रयुगलं वनमालाविभूषितम् ।। २५० ।।

लक्ष्मीनारायणो देवो ह्यभीष्टफलदोर्चितः ।
द्वे द्वे चक्रे च पार्श्वे च श्रीमन्नारायणः स्मृतः ।। २५१ ।।

द्वे द्वे चक्रेऽप्यधश्चोर्ध्वे लक्ष्मीनारायणः स्मृतः ।
ध्वजवज्राङ्कुशोपेतं एकचक्रं सुवर्तुलम् ।। २५२ ।।

लक्ष्मीनारायणं ज्ञेयं भुक्तिमुक्तिफलप्रदम् ।
ध्वजवज्राङ्कुशोपेतं वामचक्रं सुवर्तुलम् ।। २५३ ।।

लक्ष्मीनारायणं देवं भुक्तिमुक्तिफलप्रदम् ।। २५४ ।।

।। इति नारायणमूर्तिलक्षणम् ।।

।। अथ माधवमूर्तिलक्षणम् ।।

मधुवर्णो मध्यचक्रः स्निग्धसूक्ष्मतनुस्तथा ।
माधवस्स तु विज्ञेयो यतीनां मोक्षदायकः ।। २५५ ।।

अतिस्थूलं चतुश्चक्रं अतसीकुसुमप्रभम् ।
सुषिरं छिद्रबहुलं माधवं परिकीर्तितम् ।। २५६ ।।

।। इति माधवमूर्तिलक्षणम् ।।

।। अथ गोविन्दमूर्तिलक्षणम् ।।

नातिस्थूलः कृष्णवर्णः गोविन्दः पञ्चवक्त्रकः ।
दशरन्ध्रसमायुक्तः विंशच्चक्रसमन्वितः ।। २५७ ।।

नवदूर्वादलश्यामो वनमालाविभूषितः ।
गोविन्दमूर्तिर्विख्यातः सर्वकामफलप्रदः ।। २५८ ।।

।। इति गोविन्दमूर्तिलक्षणम् ।।

।। अथ विष्णुमूर्तिलक्षणम् ।।

कृष्णवर्णस्तथा विष्णुस्स्थूलचक्रस्सुशोभनः ।
गदाकारा तथा रेखा दृश्यते मध्यदेशतः ।। २५९ ।।

स्थूलवक्त्रो भवेद्विष्णुर्मोक्षदः फलदो विभुः ।
वामचक्रो बहुद्वारो उन्नतो मध्यनिम्नगः ।। २६० ।।

स कापिलः स्निग्धवर्णो विष्णुर्विषयभोगदः ।
विष्णुक्रान्तनिभाकारो वनमालाब्जचिह्नकः ।। १६१ ।।

पञ्चायुधधरः श्रीमान्विष्णुरित्युच्यते बुधैः ।

।। इति विष्णुमूर्तिलक्षणम् ।।

।। अथ मधुसूदनमूर्तिलक्षणम् ।।

मधुसूदनो महादेवः एकचक्रो महाद्युतिः ।। २६२ ।।

सर्ववर्णसमायुक्तः महातेजःप्रदः शुभः ।। २६३ ।।

।। इति मधुसूदनमूर्तिलक्षणम् ।।

।। अथ त्रिविक्रममूर्तिलक्षणम् ।।

त्रिविक्रमस्त्रिकोणाढ्यश्चक्रत्रयविभूषितः ।
प्रयत्नेन प्रजेन्द्राणां सदा पूज्यस्तु नेतरैः ।। २६४ ।।

त्रिविक्रमस्तथा देवः श्यामवर्णो महाद्युतिः ।
वामभागगते चक्रे रेखा चैव तु दक्षिणे ।। २६५ ।।

दीप्ताकारं सूक्ष्मचक्रं उन्नतं वामपार्श्वके ।
त्रिविक्रममितिख्यातं ऐश्वर्यफलदं नृणाम् ।। २६६ ।।

दीर्घाकारो महातेजाः शङ्कचक्रगदाङ्कितः ।
वनमालाधरः श्रीमान् त्रिविक्रम उदाहृतः ।। २६७ ।।

।। इति त्रिविक्रममूर्तिलक्षणम् ।।

।। अथ श्रीधरमूर्तिलक्षणम् ।।

श्रीधरस्त्रिविधो ज्ञेयः पूजकस्य शुभप्रदः ।
श्रीधरश्च तथा देवस्सहितो वनमालया ।। २६८ ।।

कदम्बकुसुमाकारो सर्वसिद्धिफलप्रदः ।
सुवर्णबिन्दुसहितं ह्रस्वचक्रं च वर्तुलम् ।। २६९ ।।

निम्नचक्रमतिह्रस्वं श्रीधरं सर्वसिद्धिदम् ।। २७० ।।

निम्नोदरमतिह्रस्वमुत्तमं श्रीधरं स्मृतम् ।
सर्वसौभाग्यदं चापि सर्वैश्वर्यप्रदायकम् ।। २७१ ।।

निम्नमूर्धा हि फलदः निम्नपार्श्वस्सुपुष्टिदः ।
निम्नपृष्ठस्त्वफलदः निम्नचक्रः प्रमोददः ।। २७२ ।।

चक्रे तु मध्यदेशे तु पङ्कजेन समन्वितः ।
सूक्ष्माननः श्यामलाङ्गः स पुनश्श्रीधरः स्मृतः ।। २७३ ।।

धनशाद्वलसंकाशं वनमालाविभूषितम् ।
किञ्चिद्विषमचक्राढ्यं श्रीकरं श्रीधरं विदुः ।। २७४ ।।

।। इति श्रीधरमूर्तिलक्षणम् ।।

।। अथ हृषीकेशमूर्तिलक्षणम् ।।

अर्धचन्द्राकृतिर्देवो हृषीकेश उदाहृतः ।
स्थूलचक्रोर्ध्वचक्रस्तु अनन्तफलदो नृणाम् ।। २७५ ।।

किञ्चिद्विषमचक्राढ्यं इन्द्रनीलनिभप्रभम् ।
हृषीकेशमिति प्राहुः शुद्धज्ञानप्रदायकम् ।। २७६ ।।

।। इति हृषीकेशमूर्तिलक्षणम् ।।

।। अथ पद्मनाभमूर्तिलक्षणम् ।।

चक्रस्योभयपार्श्वे तु पङ्कजद्वयशोभितम् ।
पद्मनाभमिति ख्यातं विदुर्नागशयं बुधाः ।। २७७ ।।

नाभिचक्रलसत्पद्मं जम्बूफलसमप्रभम् ।
पद्मनाभ इति ख्यातस्तं विदुर्नायकं बुधाः ।। २७८ ।।

निष्केशरोर्ध्वचक्रस्तु अधश्चक्रः सकेशरः ।
पद्मनाभ इति ख्यातो विपरीतो हलायुधः ।। २७९ ।।

।। इति पद्मनाभमूर्तिलक्षणम् ।।

।। अथ दामोदरमूर्तिलक्षणम् ।।

दामोदरस्तथा स्थूलो मध्ये चक्रं प्रतिष्ठितम् ।
दूर्वाभं द्वारि संकीर्णपीतरेखासमन्वितम् ।। २८० ।।

स्थूलं दामोदरं ज्ञेयं सूक्ष्मरन्ध्रं सुनिर्मलम् ।
सकापिलं सकार्ष्ण्यं च नृणामर्थफलप्रदम् ।। २८१ ।।

रेखया विलसन्मध्ये कालमेघनिभप्रभम् ।
वनमालालसत्किंचित्प्राहुर्दामोदरं मुने ।। २८२ ।।

किञ्चिद्विषमचक्राढ्यं इन्द्रनीलनिभप्रभम् ।
वनमालालसच्चक्रं प्राहुर्दामोदरं मुने ।। २८३ ।।

दामोदरस्तथा स्थूलः मध्ये चक्रं प्रतिष्ठितम् ।
वर्तुलः स्निग्धकश्चैव गवाकारस्तु दक्षिणे ।। २८४ ।।

स्थूलदामोदरो ज्ञेयः सूक्ष्मरन्ध्रो भवेत्तु सः ।
चक्रद्वयसमायुक्तः पूजितः सुखदः सदा ।। २८५ ।।

मध्ये दामसुदीर्घं च सुखसौभाग्यदायकः ।। २८६ ।।

।। इति दामोदरमूर्तिलक्षणम् ।।

।। अथ सङ्कर्षणमूर्तिलक्षणम् ।।

द्वे चक्रे एकभागेषु पूर्वभागं तु पुष्करम् ।
सङ्कर्षणस्स विज्ञेयः रक्ताभस्सर्वसिद्धिदः २८७ ।।

।। इति सङ्कर्षणमूर्तिलक्षणम् ।।

।। अथ वासुदेवमूर्तिलक्षणम् ।।

वासुदेवो विप्रजनैरुपास्यः पूजने सदा ।
द्वारदेशे समे चक्रे दृश्येते नान्तरीयके ।। २८८ ।।

वासुदेवः स विज्ञेयः शुक्लाभश्चातिशोभनः ।
रेखापञ्चायुधधरः हेमांशुसदृशप्रभः ।
नाभिचक्रयुतः शान्तो वासुदेव इतीरितः ।। २८९ ।।

।। इति वासुदेवमूर्तिलक्षणम् ।।

।। अथ प्रद्युम्नमूर्तिलक्षणम् ।।

प्रद्युम्नः सूक्ष्मचक्रस्तु पीतवर्णस्तथैव च ।
मकराभो भवेद्रेखा पार्श्वतः पृष्ठतोऽपि वा ।। २९० ।।

प्रद्युम्नस्सूक्ष्मचक्रस्तु पीतदीप्तस्सुशोभनः ।
सुषिरः छिद्रबहुलं दीपाकारं तु यद्भवेत् ।। २९१ ।।

प्रद्युम्नः सूक्ष्मचक्रस्स्यान्नीलाम्बुजचयं तथा ।
स ददाति श्रियं नृणामभक्त्यापि प्रपूजितः ।। २९२ ।।

जपाकुसुमसंकाशं वनमालाविभूषितम् ।
धनुर्बाणाम्बुजधरं प्रद्युम्नं चेष्टदं विदुः ।। २९३ ।।

।। इति प्रद्युम्नमूर्तिलक्षणम् ।।

।। अथ अनिरुद्धमूर्तिलक्षणम् ।।

अनिरुद्धो त्रिधा ज्ञेयः तत्तल्लक्षणभेदतः ।
अनिरुद्धः सूक्ष्मचक्रः नीलोत्पलनिभं तु वा ।। २९४ ।।

एतल्लक्षणसंयुक्तं सूक्ष्मचक्रलसन्मुखम् ।
सुवर्णरूप्यरेखाढ्यं अनिरुद्धं विदुर्बुधाः ।। २९५ ।।

अनिरुद्धस्तु नीलाभः वर्तुलश्चातिशोभनः ।
रेखात्रयं तु तद्द्वारे पृष्ठे पद्मेन लाञ्छितम् ।। २९६ ।।

कृष्णवर्णं समद्वारं चक्रभित्तिसमीपगम् ।
सूक्ष्मचक्रं भवेदूर्ध्वं पार्श्वे चणकपुष्पवत् ।
अनिरुद्धमिति प्रोक्तं सर्वलोकैककारणम् ।। २९७ ।।

।। इति अनिरुद्धमूर्तिलक्षणम् ।।

।। अथ पुरुषोत्तममूर्तिलक्षणम् ।।

मध्यचक्रस्सुवर्णश्च मस्तके पृथुचक्रके ।
पुरुषोत्तमाभिधो देवपूजकस्य शुभप्रदः ।। २९८ ।।

अनन्तो मूर्ध्नि चक्राढ्यः अनन्तः पुरुषोत्तमः ।
यस्या मूर्तेरुरानाङ्गं चारुचक्रसमन्वितम् ।।
तरान्मूर्तिखगेशाना (?) तन्नाम्ना पुरुषोत्तमः ।। २९९ ।।

।। इति पुरुषोत्तममूर्तिलक्षणम् ।।

।। अथ अधोक्षजमूर्तिलक्षणम् ।।

अतिकृष्णो रक्तरेखवृत्तदेहस्तु चक्रवान् ।
किंचित्कपिलसंयुक्तस्सूक्ष्मो वा स्थूल एव वा ।। ३०० ।।

अधोक्षज इति ख्यातः पूजकस्य शुभप्रदः ।

।। इति अधोक्षजमूर्तिलक्षणम् ।।

।। अथ अच्युतमूर्तिलक्षणम् ।।

चतुर्भिर्ह्यष्टचक्रैस्तु वामे दक्षिणपार्श्वगैः ।। ३०१ ।।

अधिष्ठितो मुखेऽप्येकं कुण्डलद्वयशोभितम् ।
शङ्खचक्रगदाशाङ्र्गबाणकौमोदकीधरः ।। ३०२ ।।

मुसलध्वजसत्श्वेतच्छत्रवज्राङ्कुशैर्युतः ।
सोऽच्युतः कथितो नाम्ना दुर्लभस्तपसा विना ।। ३०३ ।।

नीलस्थूलसमाकारवनमालाविभूषितः ।
सूक्ष्मचक्रधरः श्लक्ष्णो ह्यच्युतः समुदाहृतः ।। ३०४ ।।

।। इति अच्युतमूर्तिलक्षणम् ।।

।। अथ जनार्दनमूर्तिलक्षणम् ।।

शङ्खचक्राम्बुजामालः नीलः स्थूलाकृतिः शुभः ।
जनार्दन इति ख्यातः हिमांशुपरिशीतलः ।। ३०५ ।।

नीलोत्पलदलप्रख्यं नातिह्रस्वं भयापहम् ।
जनार्दनं गृहस्थानां अभीष्टार्थफलप्रदम् ।। ३०६ ।।

पूर्वभागैकवदनः पश्चादेकास्यसंयुतः ।
जनार्दनश्चतुश्चक्रश्श्रीप्रदो रिपुनाशनः ।। ३०७ ।।

अन्तर्लक्षं चतुश्चक्रं शीतलं चोत्पलप्रभम् ।
जनार्दनं विजानन्ति वनमालाविवेष्टितम् ।। ३०८

द्वारचक्रसमायुक्तं चक्रद्वादशकोज्ज्वलम् ।
वनमालायुतं श्लक्ष्णं आहुस्तं च जनार्दनम् ।। ३०९ ।।

।। इति जनार्दनमूर्तिलक्षणम् ।।

।। अथ उपेन्द्रमूर्तिलक्षणम् ।।

उपेन्द्रो मणिवर्णाभो ह्रस्वचक्रोऽतिशोभनः ।
शङ्खचक्रगदाचिह्नि नीलवर्णलसत्तनुः ।। ३१० ।।

उपेन्द्रो इति विख्यातो हरिः श्लाघ्यशुभप्रदः ।

।। इति उपेन्द्रमूर्तिलक्षणम् ।।

।। अथ हरिमूर्तिलक्षणम् ।।

श्यामलं कोमलाभन्तु दक्षपार्श्वे तु चक्रयुक् । ।। ३११

अल्पद्वारसमोपेतं हरिभूर्तिरुदाहृतम् ।। ३१२ ।।

।। इति हरिमूर्तिलक्षणम् ।।

।। अथ हयग्रीवमूर्तिलक्षणम् ।।

हयग्रीवोऽपि भगवान्रक्तपीतादि मिश्रितः ।
अङ्कुशाकृतिकरस्ताक्ष्र्यचक्रद्वयसमन्वितः ।। ३१३ ।।

पद्माकृतिस्तथा पार्श्वे कुण्डलाकृतिरेव वा ।
ज्ञानदो मोक्षदो नृणां भोगदो विनतासुत ।। ३१४ ।।

हयग्रीवोऽङ्कुशाकारो रेखाचक्रसमीपगा ।
कृष्णवर्णसमाख्यातो महासारस्वतो मतः ।। ३१५ ।।

हयग्रीवस्तु विज्ञेयः अङ्कुशप्रतिरूपकः ।
चक्रद्वयसमायुक्तः पूजितः सुमुखप्रदः ।। ३१६ ।।

दीर्घग्रीवमधोवक्त्रं अल्पचक्रमकल्मषम् ।
हयग्रीवमिति ख्यातं संसारभयमोचनम् ।। ३१७ ।।

अङ्कुशाकारवदनं दीर्घबिन्दुसमुज्ज्वलम् ।
पक्वजम्बूफलाकारं हयग्रीवं वदत्यमुम् ।। ३१८ ।।

।। इति हयग्रीवमूर्तिलक्षणम् ।।

।। अथ कपिलमूर्तिलक्षणम् ।।

कपिलः कपिलोऽत्यन्तस्पष्टचक्रसमन्वितः ।
पञ्चबिन्दुसमायुक्तो वरविद्याप्रदो नृणाम् ।। ३१९ ।।

।। इति कपिलमूर्तिलक्षणम् ।।

।। अथ यज्ञमूर्तिलक्षणम् ।।

यज्ञमूर्तिस्तु भगवान् रक्तपीतादि मिश्रितः ।
द्वारस्य वामतश्चक्रं सुक्स्रुवौ दक्षिणेऽपि च ।। ३२० ।।

यज्ञमूर्तिरिति ख्यातः सर्वक्रतुफलप्रदः ।। ३२१ ।।

।। इति यज्ञमूर्तिलक्षणम् ।।

।। अथ दत्तात्रेयमूर्तिलक्षणम् ।।

सितारुणः सिताभश्च ह्रस्वपृष्ठोन्नतो भवेत् ।
अक्षमालाकृतिः पृष्ठे दत्तात्रेयः शुभप्रदः ।। ३२२ ।।

।। इति दत्तात्रेयमूर्तिलक्षणम् ।।

।। अथ शिंशुमारमूर्तिलक्षणम् ।।

शिंशुमारो दीर्घकायः बलशाल्यतिगह्वरः ।
उन्नतः पुच्छभागे तु चक्रेणैकेन संयुतः ।। ३२३ ।।

सर्वाधारः स विज्ञेयः सर्वसिद्धिप्रदो नृणाम् ।

।। इति शिंशुमारमूर्तिलक्षणम् ।।

।। अथ मुकुन्दमूर्तिलक्षणम् ।।

ज्ञेयो द्वादशरन्ध्रस्तु मुकुन्दः साध्यमेव हि ।। ३२४ ।।

षण्मुखेन मुकुन्दाख्यः सतां मुक्तिप्रदायकः ।

।। इति मुकुन्दमूर्तिलक्षणम् ।।

।। अथ हंसमूर्तिलक्षणम् ।।

हंसस्तु धनुराकारो नीलश्वेतविमिश्रितः ।
चक्रपद्मसमोपेतः केवलं मोक्षदायकः ।। ३२५ ।।

।। इति हंसमूर्तिलक्षणम् ।।

।। अथ परमहंसमूर्तिलक्षणम् ।।

परमहंसः खगेशान शिखण्डिगलसन्निभः ।
स्निग्धः आयतपृष्ठैश्च वर्तुलद्वारसंयुतः ।। ३२६ ।।

बिलमध्ये तथा चक्रे दृश्येतेऽत्यन्तशोभने ।
चक्रस्य दक्षिणे पार्श्वे द्युमणिर्भानुको भवेत् ।। ३२७ ।।

वर्तुलाकृतिवद्वामे दृश्यते विनतासुत ।
मूर्तिस्स्यात्परमहंसाख्या चतुर्वर्गफलप्रदा ।। ३२८ ।।

।। इति परमहंसमूर्तिलक्षणम् ।।

।। अथ वैकुण्ठमूर्तिलक्षणम् ।।

वैकुण्ठमणिवर्णाभो वामपार्श्वैकचक्रकः ।
द्वारोपरि तथा रेखा पद्मकारा सुशोभना ।। ३२९ ।।

रेखाष्टकसमोपेता पद्मं सदृशगह्वरम् ।
वनमालायुतं श्यामं वैकुण्ठं कोमलं विदुः ।। ३३० ।।

।। इति वैकुण्ठमूर्तिलक्षणम् ।।

।। अथ पुण्डरीकाक्षमूर्तिलक्षणम् ।।

पार्श्वे वा मूर्ध्नि वा पृष्ठे नयनद्वयसंयुतः ।
पुण्डरीकाक्षमूर्तिस्स्यात्सर्वलोकैकवश्यकः ।। ३३१ ।।

।। इति पुण्डरीकाक्षमूर्तिलक्षणम् ।।

।। अथ लक्ष्मीपतिमूर्तिलक्षणम् ।।

मूर्ध्नि वा पार्श्वतो वापि मयूरगलसन्निभः ।
कृष्णवर्णः सूक्ष्मचक्रः [1]पृथुलास्यः स्रगन्वितः ।। ३३२

लक्ष्मीपतिरिति ख्यातो लक्ष्मीसंपत्तिदायकः ।

।। इति लक्ष्मीपतिमूर्तिलक्षणम् ।।

---

१. पृथुनाभिसमन्वितः इति पाठान्तरम् ।

।। अथ देवदेवमूर्तिलक्षणम् ।।

दुर्वाभः सूक्ष्मवदनः पीतरेखासुसूक्ष्मकाः ।। ३३३ ।।

विदिक्षु दिक्षु सर्वासु प्रदृश्यन्ते समन्ततः ।
स देवदेवो विज्ञेयः पुराणपुरुषोत्तमः ।। ३३४ ।।

।। इति देवदेवमूर्तिलक्षणम् ।।

।। अथ वटपत्रशायिमूर्तिलक्षणम् ।।

वटपत्रशायी भगवान्वर्तुलान्यतिशोभनः ।
क्षीरबुद्बुदवत्ताक्ष्यनीलश्वेतप्रभस्तथा ।। ३३५ ।।

चक्रस्य वामतः शंखं दक्षिणे पद्ममेव च ।

।। इति वटपत्रशायिमूर्तिलक्षणम् ।।

।। अथ विश्वम्भरमूर्तिलक्षणम् ।।

वदनैके मध्यदेशे चतुश्चंक्रसबिन्दुलः ।। ३३६ ।।

चक्राणां वापि विंशत्या युक्तो विश्वम्भरः शुभः ।
श्यामो द्वादशरन्ध्रस्तु चतुर्विंशतिचक्रकः ।
विश्वम्भर इति ख्यातः सर्वसौभाग्यदायकः ।। ३३७ ।।

।। इति विश्वम्भरमूर्तिलक्षणम् ।।

।। अथ विश्वरूपमूर्तिलक्षणम् ।।

विश्वरूपो हरिस्साक्षात्पारावतपदोपदः ।
बहुचक्राङ्कितस्ताक्ष्यनैकमूर्तिसमन्वितः ।। ३३८ ।।

पञ्चरन्ध्रं स्थूलतरं परुषं बहुचक्रकम् ।
विश्वरूपमनन्तं वा पुत्रपौत्रादिकप्रदम् ।। ३३९ ।।

।। इति विश्वमूर्तिलक्षणम् ।।

।। अथ गरुडध्वजमूर्तिलक्षणम् ।।

स्वर्णश्रृङ्गकरं सौम्यं वर्तुलं स्निग्धकेसरम् ।
चक्रमध्येगतः कृष्णरेखाबिन्दुसमन्वितम् ।। ३४० ।।

लक्ष्मीकरो वैनतेयगरुडध्वजसंज्ञिकः ।। ३४१ ।।

।। इति गरुडध्वजमूर्तिलक्षणम् ।।

।। अथ पीताम्बरमूर्तिलक्षणम् ।।

स्निग्धगोरोचनाकारः सुवक्त्रो वर्तुलोऽपि वा ।
पीतांबरधरो देवः साम्राज्यफलदायकः ।। ३४२ ।।

द्वारदेशे समे चक्रे बहुवर्णसमन्वितः ।
पीताम्बरधरो देवः सौख्यैकफलदोर्चितः ।। ३४३ ।।

पीतगोरोचनाकारो वर्तुलो वदनोऽपि वा ।
पीताम्बरधरो देवः साम्राज्यफलदायकः ।। ३४५ ।।

।। इति पीताम्बरमूर्तिलक्षणम् ।।

।। अथ सत्यवीरश्रवोमूर्तिलक्षणम् ।।

सुवर्तुलो ह्रस्वचक्रः सर्वाङ्गे हेमपिङ्गलः ।
सत्यवीरश्रवाः प्रोक्तः सर्वसौभाग्यवर्धनः ।। ३४६ ।।

।। इति सत्यवीरश्रवोमूर्तिलक्षणम् ।।

।। अथ अमृताहरणमूर्तिलक्षणम् ।।

अमृताहरणो देवो नीलोत्पलसमप्रभः ।
वर्तुलो ह्रस्ववदनो मध्यचक्रेऽतिकोमलः ।। ३४७ ।।

।। इति अमृताहरणमूर्तिलक्षणम् ।।

।। अथ चक्रपाणिमूर्तिलक्षणम् ।।

पूर्वभागत्रिवदनः पश्चादेकास्यसंयुतः ।
चक्रपाणिरिति ख्यातः चक्रवृत्तित्वदायकः ।। ३४८ ।।

।। इति चक्रपाणिमूर्तिलक्षणभ् ।।

।। अथ मायानारायणमूर्तिलक्षणम् ।।

निर्मले सुमुखे चक्रे बहुलास्यसमन्ततः ।
बहुरूपि समाख्यातः पूजकस्य शुभप्रदः ।। ३४९ ।।

।। इति मायानारायणमूर्तिलक्षणम् ।।

।। अथ पुण्डरीकमूर्तिलक्षणम् ।।

एकचक्रयुतो वक्त्रे शुक्लवर्णसमन्वितः ।
पुण्डरीकः समाख्यातः पूजितो मोक्षदायकः ।। ३५० ।।

।। इति पुण्डरीकमूर्तिलक्षणम् ।।

।। अथ पारिजातहरमूर्तिलक्षणम् ।।

अधोपरिद्विचक्राढ्यं पारिजाताहरं स्मृतम् ।
ब्रह्मचर्यव्रतस्थेन पूजनीयं प्रयत्नतः ।। ३५१ ।।

।। इति पारिजातहरमूर्तिलक्षणम् ।।

।। अथ सुदर्शनमूर्तिलक्षणम् ।।

शतरेखासमायुक्तं मध्ये चक्रं सुदर्शनम् ।
सर्वाघौघप्रशमनं नृणां निश्रेयसप्रदम् ।। ३५२ ।।

पद्माकारं बृहच्चक्रं निम्ननाभिसुदर्शनम् ।
यतिभिः सेवनीयं तत्स्निग्धवर्णं च रक्तकम् ।। ३५३ ।।

एकचक्रश्शिरोदेशे कृष्णवर्णो मुखे तथा ।
सुदर्शनस्स विज्ञेयस्सर्वपापप्रणाशनः ।। ३४४ ।।

।। इति सुदर्शनमूर्तिलक्षणम् ।।

।। अथ जगद्योनिमूर्तिलक्षणम् ।।

द्वारचक्रो रक्तवर्णः जगद्योनिः प्रकीर्तितः ।
प्रदक्षिणं वर्तुलश्च वनमालाविभूषितः ।। ३५५ ।।

।। इति जगद्योनिमूर्तिलक्षणम् ।।

।। अथ अव्ययमूर्तिलक्षणम् ।।

कृष्णवर्णयुतश्चापि धनधान्यसुखप्रदः ।
पूजनीयः प्रयत्नेन शिरः स्निग्धश्च वर्तुलः ।। ३५६ ।।

बहुवर्णो द्वारचक्रो सौख्यदः पूजितोऽव्ययः ।। ३५७ ।।

।। इति अव्ययमूर्तिलक्षणम् ।।

।। अथ अनन्तमूर्तिलक्षणम् ।।

चतुर्दशादि प्रभृतिविंशात्प्राक् चक्रलाञ्छितः ।
नानावर्णो ह्यनन्तात्मा नागभोगेन चिह्नितः ।। ३५८ ।।

अनेकमूर्तिसंयुक्तः सर्वकामफलप्रदः ।
प्रदक्षिणावर्तनवद्वनमालाविभूषितः ।। ३५९ ।।

कृष्णवर्णयुतश्चापि धनधान्यफलप्रदः ।
दीर्घाकारं महास्थूलं सप्तचक्रसमन्वितम् ।। ३६० ।।

अथवा अष्टचक्रं तु दशचक्रं शुभावहम् ।
त्रयोदशं महापुण्यं चतुर्दशमहाफलम् ।। ३६१ ।।

पीतवर्णं महाकृष्णं श्यामलं बहुवर्णकम् ।
शङ्खचक्रगदापद्मवनमालाविभूषितम् ।। ३६२

अनन्तमूर्तिर्विज्ञेयः सर्वकामफलप्रदः ।
अनन्तशायिनं स्थूलं चक्रं चन्द्रमिवाद्भुतम् ।। ३६३ ।।

दारिद्र्यनाशनं पुंसां आयुरारोग्यमोक्षदम् ।
शेषभोगसमायुक्तः शिला सूक्ष्मा यदा भवेत् ।। ३६४ ।।

सा प्रयत्नेन पूज्याथ शिला स्निग्धा च वर्तुला ।
नानावर्णो ह्यनन्तश्च नागभोगेन वेष्टितः ।। ३६५ ।।

बहुवर्णो द्वारचक्रः सौख्यतः पूजितोऽव्ययः ।

।। इति अनन्तमूर्तिलक्षणम् ।।

।। अथ त्रिमूर्तिलक्षणम् ।।

ऊर्ध्वाधस्तात्त्रिवदनः षट्चक्रः श्यामलो विभुः ।। ३६६ ।।

त्रिमूर्तिरिति विख्यातः सर्वसौभाग्यदायकः ।
चक्रत्रयसमानो वा त्रिमूर्तिः स्याच्छुभप्रदः ।। ३६७ ।।

।। इति त्रिमूर्तिलक्षणम् ।।

।। अथ हरिहरमूर्तिलक्षणम् ।।

अथोत्तरे यदि भवेत् द्वे द्वे चक्रे सुशोभने ।
एतद्धरिहरं विद्यान्नृणां दारिद्र्यदं क्रमात् ।। ३६८ ।।

चतुश्चक्रे हरिहरो द्विमुखोर्ध्वं तथाप्यधः ।
विनश्यति गृहस्थानां धनं क्षेत्रं कुलं क्रमात् ।। ३६९ ।।

शिवनाभयुतो मूर्ध्नि पृष्ठे वापि भवेद्यदि ।
यस्तद्धरिहरं प्रोक्तं सर्वसौभाग्यदायकम् ।। ३७० ।।

।। इति हरिहरमूर्तिलक्षणम् ।।

।। अथ शङ्करनारायणमूर्तिलक्षणम् ।।

शिवनाभयुतः पार्श्वे वामे वा दक्षिणेऽपि वा ।
स च शङ्करपूर्वः स्यान्नारायण इतीरितः ।। ३७१ ।।

एकवक्त्रो द्विवक्त्रो वा शिवलिङ्गयुतो भवेत् ।
चन्द्रगङ्गासमायुक्तः वर्णद्वयसमन्वितः ।। ३७२ ।।

स च शङ्करपूर्वः स्यानानारायण इतीरितः ।
द्विलिङ्गो वा त्रिलिङ्गो वा चतुःपञ्चादि लिङ्गवान् ।।

ततः शङ्करनामा स्याद्देवदेवत्वदायकः ।
लिङ्गैः पञ्चभिरावृत्तः षड्भिर्वा सप्तभिश्च वा ।। ३७४ ।।

तत्तन्मूर्तिफलं प्रोक्तं मया वक्तुं न शक्यते ।। ।।

।। इति शङ्करनारायणमूर्तिलक्षणम् ।।

।। अथ स्वयम्भूमूर्तिलक्षणम् ।।

मूर्ध्नि वर्तुलरेखाभिरावृतो नीलवर्णवान् ।
दीर्घास्यः पृथुचक्रस्तु स्वयम्भूरिति विश्रुतः ।। ३७५ ।।

केवलं मोक्षफलदः अर्चकस्य न संशयः ।

।। इति स्वयम्भूमूर्तिलक्षणम् ।।

।। अथ परमेष्ठीमूर्तिलक्षणम् ।।

परमेष्ठी तु शुक्लाभः चक्रं पद्मं समन्वितम् ।।

द्विधा कृतस्तथा पृष्ठे सुषिरं वापि वर्तुलः ।
पीतवर्णयुतो वापि भुक्तिमुक्तिफलप्रदः ।। ३७७ ।।

।। इति परमेष्ठीमूर्तिलक्षणम् ।।

।। अथ चतुर्मुखमूर्तिलक्षणम् ।।

चतस्रो यस्य दृश्यन्ते रेखाः पार्श्वसमीपतः ।
द्विचक्रो मध्यदेशे तु सा शिला स्याच्चतुर्मुखी ।। ३७८ ।।

।। इति चतुर्मुखमूर्तिलक्षणम् ।।

।। अथ पितामहमूर्तिलक्षणम् ।।

पितामहश्चतुर्वक्त्रो ह्यष्टचक्रसमन्वितः ।
अमुखः स्वर्णबिन्दुश्च स्वर्णगर्भः प्रकीर्तितः ।। ३७९ ।।

।। इति पितामहमूर्तिलक्षणम् ।।

।। अथ हिरण्यगर्भमूर्तिलक्षणम् ।।

हिरण्यगर्भं परमं पवित्रं भुवि दुर्लभम् ।
अन्तर्ध्वनिसमायुक्तं कृष्णवर्णं सुवृत्तकम् ।। ३८० ।।

वर्तुलो ह्रस्ववदनश्चक्रमध्येऽतिकोमलः ।
श्रीवत्सकमलाकारलाञ्छनं चक्रपार्श्वके ।। ३८१ ।।

हिरण्यगर्भो विख्यातः पृथुनाभिसमन्वितः ।
हिरण्ये विमिश्रस्तु कीर्तिदः कुलवर्धनः ।। ३८२ ।।

।। इति हिरण्यगर्भमूर्तिलक्षणम् ।।

।। अथ सीरपाणिमूर्तिलक्षणम् ।।

सर्वत्र रक्तवर्णः स्यात्पीतनीलाभवर्जितः ।
सुचक्रो द्वारचक्रो वा सीरपाणिः शुभप्रदः ।। ३८३ ।।

।। इति सीरपाणिमूर्तिलक्षणम् ।।

।। अथ प्रलंबघ्नमूर्तिलक्षणम् ।।

एकचक्रस्तु वदने रक्तवर्णसमन्वितः ।
प्रलंबघ्न इति ख्यातः पूजितो मृत्युदायकः ।। ३८४ ।।

।। इति प्रलंबघ्नमूर्तिलक्षणम् ।।

।। अथ नरमूर्तिलक्षणम् ।।

नरमूर्तिस्तु भगवान् अतसीकुसुमप्रभः ।
एकनाभिसमोपेतः अक्षसूत्रं तु पार्श्वके ।। ३८५ ।।

।। इति नरमूर्तिलक्षणम् ।।

।। अथ शिवनाभिमूर्तिलक्षणम् ।।

कूर्माकृतिरधोभागलिङ्गभागः खुरान्वितः ।
शिवनाभिरिति ख्यातः भुक्तिमुक्तिफलप्रदः ।। ३८६ ।।

।। इति शिवनाभिमूर्तिलक्षणम् ।।

।। अथ अघोरमूर्तिलक्षणम् ।।

सर्वत्र लोहिताकारो मूर्ध्नि रक्तजटाशशी ।
अघोरा सा परित्याज्या गृहिभिः तस्य पूजने ।। ३८७ ।।

।। इति अघोरमूर्तिलक्षणम् ।।

।। अथ सद्योजातमूर्तिलक्षणम् ।।

हेमवर्णसमायुक्ता हेमवर्णसमुज्जवला ।
मस्तके गोखुरभासा चन्द्रगङ्गासमन्विता ।। ३८८ ।।

सद्योजाताभिधा श्रेष्ठा पुत्रपौत्रधनप्रदा ।। ३८९ ।।

।। इति सद्योजातमूर्तिलक्षणम् ।।

।। अथ वामदेवमूर्तिलक्षणम् ।।

लिङ्गे शक्ता रक्तवर्णा श्वेतवर्णजटायुता ।
वामदेवाभिधा श्रेष्ठा गृहिभिः पूजिता सदा ।। ३९० ।।

।। इति वामदेवमूर्तिलक्षणम् ।।

।। अथ महेशानमूर्तिलक्षणम् ।।

किञ्चित्कपिलसंयुक्ता कृष्णनीलजटाकुला ।
पार्श्वे रेखासमोपेता महेशानाभिधा भवेत् ।। ३९१ ।।

।। इति महेशानमूर्तिलक्षणम् ।।

।। अथ तत्पुरुषमूर्तिलक्षणम् ।।

पूर्वे विद्युज्जटायुक्ता ऊर्ध्वं पिङ्गजटाशशी ।
तत्पूरुषाभिधाना स्याद्दुर्लभा सर्वकामदा ।। ३९२ ।।

।। इति तत्पुरुषमूर्तिलक्षणम् ।।

।। अथ सूर्यमूर्तिलक्षणम् ।।

बाह्ये वाभ्यन्तरे वापि चक्रद्वादशसंयुता ।
सूर्यमूर्तिः खगेशान सर्वव्याधिविनाशिनी ।। ३९३ ।।

।। इति सूर्यमूर्तिलक्षणम् ।।

।। अथ हेहयमूर्तिलक्षणम् ।।

गर्भागारे चतुश्चक्रपद्मे चेद्दक्षिणे बहिः ।
हेहयाधिपतिर्नाम सर्वसिद्धिप्रदायकः ।। ३९४ ।।

।। इति हेहयमूर्तिलक्षणम् ।।

।। अथ दत्तात्रेयमूर्तिलक्षणम् ।।

कृष्णवर्णयुतस्सोऽपि दत्तात्रेयाभिधो भवेत् ।। ३९५ ।।

।। इति दत्तात्रेयमूर्तिलक्षणम् ।।

।। अथ विष्वक्सेनमूर्तिलक्षणम् ।।

एकचक्रयुतो वक्त्रे बहुवर्णसमन्वितः ।
विष्वक्सेन इति ख्यातो गमनैकफलप्रदः ।। ३९६ ।।

।। इति विष्वक्सेनमूर्तिलक्षणम् ।।

।। अथ क्षीराब्धिशयनमूर्तिलक्षणम् ।।

एकचक्रस्तु वदने पञ्चायुधलसत्तनुः ।
रेखया वर्तुलः पृष्ठे क्षीरकान्तिसमन्वितः ।। ३९७ ।।

चक्रस्योभयपार्श्वे तु फणिपङ्कजशोभितः ।
सुवर्तुलश्च सुस्निग्धः क्षीराब्धिशयनः शुभः ।। ३९८ ।।

एवं लक्षणसंपन्नाः शिलाश्चक्राद्यलंकृताः ।
पूजयेद्यः त्रिसन्ध्यं च स मुक्त इति निर्णयः ।। ३९९ ।।

इष्टा यस्येह या मूर्तिः स तां यत्नेन पूजयेत् ।
पूजयित्वा फलं सम्यक् प्राप्नोतीह परत्र च ।। ४०० ।।

सालग्रामाः समाः पूज्याः विषमा न कदाचन ।
विषमे त्वेक एव स्यात्समे द्वे न कदाचन ।। ४०१ ।।

द्वादशैव शिला यो वै सालिग्रामसमुद्भवाः ।
अर्चयेद्वैष्णवो नित्यं तस्य पुण्यमनन्तकम् ।। ४०२ ।।

किं पुनः बहुशोकस्तु पूजयेद्वैष्णवो नरः ।
सालग्रामोद्भवशिलानिर्मितं यत्र नीयते ।। ४०३ ।।

तस्य दर्शनमात्रेण सर्वान्कामानवाप्नुयात् ।। ४०४ ।।

खण्डितं मुण्डितं चैव पार्श्वभिन्नं तथा स्थितम् ।
सालिग्रामसमुद्भूतं शिलामात्रं न दोषभाक् ।। ४०५ ।।

न प्रतिष्ठा न संस्कारो न प्रायश्चित्तमेव च ।
नोपचारोऽपचारश्च विद्यन्ते वै खगाधिप ।। ४०६ ।।

मूर्त्यन्तरं तु बिम्बेषु न यष्टव्यं तदेववत् (?) ।
सालग्रामशिलायां तु यष्टव्याः सर्वमूर्तयः ।। ४०७ ।।

चक्राङ्कितशिलासार्धं द्वारकायां समुद्भवाम् ।
यः पूजयेदनुदिनं स याति परमां गतिम् ।। ४०८ ।।

सालग्रामशिला यत्र यत्र द्वारवती शिला ।
शङ्खं तु तुलसीपत्रं तत्र सन्निहितो हरिः ।। ४०९ ।।

सालिग्रामोद्भवो देवो देवो द्वारवतीभवः ।
उभयोः सङ्गमो यत्र ब्रह्महत्यां व्यपोहति ।। ४१० ।।

सालग्रामशिलां प्राप्य स गयां स्नानमाचरेत् ।
नश्यन्ति सर्वपापानि ब्रह्महत्यायुतानि च ।। ४११ ।।

विष्णुपादोदकं नित्यं शिरसा धारयेत्पिबेत् ।
नियमेनापि यो मर्त्यः स याति परमं पदम् ।। ४१२ ।।

अग्निष्टोमसहस्रस्य वाजपेयशतस्य च ।
यत्पुण्यं लभते नित्यं विष्णोर्नैवेद्यभक्षणम् ।। ४१३ ।।

जप्तं हुतं तथा दत्तं अर्चनं च ततः क्रिया ।
सालग्रामसमीपे तु सर्वं कोटिगुणं भवेत् ।। ४१४ ।।

सालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम् ।
भूदानां तेन दत्तं स्यात्सशैलवनकाननम् ।। ४१५ ।।

सालग्रामशिलास्तोत्रं यः पठेद्दिनमुत्तमम् ।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ।। ४१६ ।।

।। इति सालग्रामलक्षणं समाप्तम् ।।

।। श्रीरामचन्द्रार्पणमस्तु ।।

எமது வெளியீடுகள்

காலபிரகாசிகா	100-00
நக்ஷத்திர சிந்தாமணி (பாகம்-II)	100-00
நக்ஷத்திர சிந்தாமணி (பாகம்-III)	200-00
அமரகோசம் (பாகம்-I)	90-00
அமரகோசம் (பாகம்-II)	60-00
அமரகோசம் (பாகம்-III)	60-00
பிரகதீஸ்வர மாகாத்மியம்	43-00
ஜைனிஸம் கேட்லாக்	10-00
தக்ஷிணாமூர்த்தி ஸம்ஹிதை	35-00
காயத்ரீகோசம்	35-00
கீதகோவிந்தம்	25-00
கல்பலதா (ஸ்ரீருத்ரபாஷ்யம்)	22-00
பாணினீய தாதுபாடம்	30-00
விருத்தரத்னாவளி	30-00
பலவதி	120-00
நந்திநாகரி சுவடிகளின் அட்டவணை	25-00
பிரபஞ்சசாரசார ஸங்கிரஹம் (பாகம்-I)	180-00
பிரயோக ரத்னமாலா	55-00
ரத்ன பரீக்ஷை	40-00
சப்தம் தாளம் சொற்கட்டு	40-00
ஸாம்ராஜ்ய லக்ஷ்மீ தீபிகா	100-00
ஸ்தோத்ர ராமாயணம்	25-00
நாககுமார காவியம்	55-00
விமானார்ச்சன கல்பம் (பாகம்-II)	75-00
சூலினிகல்பம்	50-00
சூர்யசதகம்	50-00
தஞ்சை நாயக்கர் வரலாறு	205-00
யதிராஜவிஜயம்	35-00
பிரபோதசந்திரிகை	70-00

வேண்டுகோள்

கருணையுள்ளங்கொண்ட நம் முன்னோர்கள் அரிய பெரிய இலக்கியங்களையும், பிறவற்றையும் பனை ஓலைகளில் எழுதிச் சுவடிகளாக நமக்குத் தந்தனர். அவை பல்வேறு இடங்களில் முடங்கி உள்ளன. சுவடிகள் பழுதடைவதற்குமுன் சரசுவதி மகாலுக்கு அன்பளிப்பாகக் கொடுத்துதவினால், அவை மக்களுக்குப் பயன்படும்.

மகாலுக்குக் கொடுப்பதன் மூலம், சுவடி தந்தவர்களும், சுவடி எழுதியோரும் அழியாப்புகழை, பெருமைசால் சரசுவதி மகால் உள்ளளவும் பெறுவர். அவை பதிப்பாகி வருமாயின் சுவடி தந்தார் பெயர் இடம்பெறுவதோடு, அப்பதிப்பில் ஐந்து பிரதிகளும் பெறுவர்.

எனவே, நாம் பெற்ற பேறு பெறுக இவ்வையகம் என்ற எண்ணமுடைய நற்பண்பாளர்கள் தம்மிடமுள்ள சுவடிகளைச் சரசுவதி மகாலுக்குத் தந்துதவ வேண்டுகிறேன்.

மாவட்ட ஆட்சித்தலைவர்
மற்றும் இயக்குநர்
சரசுவதி மகால் நூலகம்.

தஞ்சாவூர்

SARASVATI MAHAL LIBRARY PRESS